॥ अथ ॥

विवाह पद्धतिः

नेपाली भाषा - टीका स्वयम्बर सहितम्

प्रकाशक : श्री दुर्गा साहित्य भण्डार
पोस्ट बाक्स नं० 1096
नेपाली खपड़ा, वाराणसी - 221001

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ

नेपाली विवाह-पद्धतिः

(कन्यादान-महासङ्कल्पसमलंकृतः)

प्रकाशक :

श्री दुर्गा साहित्य भण्डार

पो. बॉ. नं. १०९६

नेपाली खपड़ा, वाराणसी-१(उ.प्र.)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राप्तिस्थान -
श्री दुर्गा साहित्य भण्डार
पो. बॉ. नं. १०९६
नेपाली खपड़ा, वाराणसी-१ (उ. प्र.)

मूल्य : भा. रु. ४०/-

मुद्रक :
दुर्गा ग्राफिक्स
नेपाली खपड़ा, वाराणसी
फोन : २३३९७८९

विषय-तालिका

		पृष्ठ
१.	स्वयंवर	२३
२.	पटलाञ्छन विधिः	२९
३.	वाग्दान	३१
४.	वरणी	३५
५.	कन्यादानविधिः	४२
६.	विवाहविधिः	७४
७.	सप्तपदी	१०५
८.	सिन्दूरार्पणम्	११०
९.	मधुपर्कप्राशनम्	११२
१०.	अक्ष (पाशा) क्रीडनम्	११३
११.	ग्रहतिलकम्	११८
१२.	उत्तराङ्गकर्म	१२१
१३.	पूर्णाहुतिः	१२३
१४.	घृतच्छाया	१२४
१५.	छोरी अन्भाउनु	१२८
१६.	चतुर्थीकर्म	१३३
१७.	अर्कविवाहः	१४४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. बिहेमा के-के गर्ने ?

१. कुरो चलाउने
२. केटी माँग्ने
३. जुराउने
४. दिन तोक्ने
५. जनै सुपारी गर्ने (कुरो छिन्ने)
६. लुगाफाटो किन्ने
७. सिन्दूरे र लगने लुगा किन्ने
८. लगन लेखाउने
९. साइपाटो पठाउने
१०. जग्गे बनाउने
११. पूर्वाङ्ग गर्ने
१२. वरको बाबुले मातृका-पूजा गर्ने
१३. वरको बाबुले नान्दीश्राद्ध गर्ने
(बाबुको बाबू भए जिबाबुले नै नान्दी गर्ने)
१४. ग्रहशान्ति गर्ने
१५. दुलहा अन्भाउने
१६. रत्यौली (रमाइलो) खेल्ने
१७. भत्करु पठाउने
१८. जन्ती पर्सने
१९. वाग्दान र वरणी गर्ने
२०. स्वयंवर गर्ने (ऐच्छिक)
२१. पटलाञ्छन गर्ने (ऐच्छिक)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२२. जन्ती ख्वाउने
२३. कन्यादान गर्ने
२४. विवाह गर्ने
२५. राष्ट्रभृद् होम
२६. जयहोम
२७. अभ्यातानहोम
२८. गुप्ताहुतिहोम
२९. लाजहोम
३०. पर्वतपूजा
३१. सप्तपदी
३२. सिन्दूरार्पणम् (सिन्दूर हाल्ने)
३३. मङ्गलसूत्र (पोते) प्रदानम्
३४. ठाउँ सार्ने
३५. मधुपर्क (माहुर) प्राशनम्
३६. ग्रहतिलकम्
३७. अक्ष क्रीडनम् (पासा खेल्ने)
३८. पाती प्रसारी अभिषेक गर्ने
३९. छोरी अन्भाउने
४०. अर्तिसियाँली गर्ने
४१. घृतधारा गर्ने (चुल्ठो जोर्ने)
४२. पोर्थी भर्ने
४३. भँडार देखाउने
४४. चतुर्थी गर्ने
४५. द्विरागमन् (दुरान फर्काउने)

।। इति ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२. बिहेको मेलोमेसो

विवाहका लागि केटी माँग्ने या केटो ठीक गर्न जानेलाई लमी भन्दछन् । लमीले केटी या केटोको कुरो मिलाएपछि अठार वर्ष ननाघेकी केटी र केटो कुमार भए ज्योतिषीलाई भनेर जुराई जुरे मात्र विवाहको महीना, दिन निश्चित गरी केटीकहाँ गएर जनै-सुपारी गर्ने अर्थात् जनै सुपारी आदान-प्रदान गरी कुरो छिन्ने र लेखापढी गर्ने । अनि आपसमा रातो मसीले सेतो कागतमा लेखापढी समेत गर्ने र कन्यापक्षले कन्या र वरका लागि एवम् वरपक्षले वर र कन्याका लागि सिन्दूरे र लगनगाँठे-सहित लुगाफाटा गरगहना आदि किनमेल गरिसकेपछि ज्योतिषीलाई भनेर या पुरेत बाजेले नै पूर्वाङ्गको साइत र कन्यादानको लगन रातो मसीले लेखाई वा लेखी दुवै पक्षको पूर्वाङ्ग एकैचोटि गर्नुपर्ने हुनाले त्यो लगनपत्र विवाहको पहिलो दिन या अझै अघाडि नै पुग्ने गरी वरपक्षले कन्यापक्षकहाँ पठाउनुपर्छ, जसलाई साइपाटो (साइतपत्र)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पठाउनु भन्दछन् । यो काम घरैमा सकेर ब्यौलो अन्भाए पनि हुन्छ । धेरै टाढा जानुपर्ने भए कन्याकै गाउँको नजीकपुंडो डेरा डालेर गरे पनि हुन्छ । ब्यौलो बिदा गर्ने दिन वा पहिलो दिन वरलाई बुकुवा-स्नान अनि घडी थाप्नुपूर्वक पूर्वाङ्ग-मातृकापूजा-नान्दीश्राद्ध-गृहशान्ति सकेर मात्रै ब्यौलो अन्भाइन्छ । ब्यौलो अन्भाएको राति वरपक्षका आइमाईले रमैलो मनाउन रत्यौली खेल्छन् र त्यसमा वरकी आमालाई उल्लीबिल्ली पार्ने गर्छन् ।

कन्यापक्षकाले पनि पूर्वाङ्गकै दिन बिहानै कन्यालाई बुकुवा-स्नान गराउनुपर्छ ।

३. पूर्वाङ्ग गर्दा

साइपाटेहरू फर्किएपछि दलानमा या आँगनमा गरिने पूर्वाङ्गमा पाँच जना ब्राह्मण, चारोटी केटी, दुई जना सधवा स्त्री, पाँचोटा दमाइँ चाहिन्छ । सामान पहिल्यै ठिक्क पारिराखेको हुन्छ । जग्गे पनि बनाइसकेको हुन्छ । त्यसैलाई विधि पुऱ्याउने काम पूर्वाङ्गमा गरिन्छ । यो काम मातृकापूजाभन्दा पहिल्यै गरिन्छ। मातृकापूजा र नान्दीश्राद्ध

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गर्ने विधि ग्रह-शान्तिको पुस्तकको पुछारमा रहन्छ ।

यसमा पहिले पूर्वाङ्गमा भेला भएका सबैलाई रातो अछेताको टीका लगाइदिने र सनाई बजाउने दमाइँहरूलाई राता अक्षता छर्किदिने ।

पूर्वाङ्ग गर्दा पहिले यौटा फराक मुखको भाँडोमा घडी (बनेको पात्रविशेष) मा सूर्योदय हुँदा घडी थाप्ने र घडी कुर्ने एक जना ब्राह्मण कुरुवा राख्ने । किनकि नारीघडीमा रेल्वे समय रहन्छ । स्थानीय समयसँग मिल्दैन । उदयबाट सूर्यको गति प्रत्येक आठ कोशमा एक मिनट अगाडि बढ्छ ।

पूर्वाङ्गको साइत भएपछि सबभन्दा पहिले दुई जना ब्राह्मणले मङ्गल पढ्दा -शुभ लग्न भो, शुभ लग्न भो, शुभ लग्न भो -

मङ्गलं भगवान् विष्णुः, मङ्गलं गरुडध्वजः।
मङ्गलं पुण्डरीकाक्षः, मङ्गलायतनो हरिः।।

भनेपछि सबैले आ-आफ्नू काम एकैचोटि गर्ने । जस्तै- पाँच जना दमाईंले वा जतिले हुन्छ सनाई आदि बाजा बजाउने । त्यस्तै, दुई जना बाहुनले भार

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

बाँध्ने, तिनमा यौटाले मोटा-मोटा, लामा-लामा दुई लाँक्रा पातसहितका सिङ्गा ऊखुलाई पहेंलो धराले दुवै टुप्पामा र बीचमा बाँध्ने । अर्कोले एकापट्टिको टुप्पोमा पहेँलो चन्दनले सिँगारिएको सानू ठेकीमा दही भरेर पहेँलै टालाले बाँधी त्यो ठेकी झुन्ड्याउने र अर्को टुप्पोमा यौटा पेरुङ्गोमा केही साग, केही सुकेका माछा, केही खानेकुरा र केही फल राखेर पेरुङ्गाको मुख पहेँलै टालाले बाँधी झुन्ड्याउने ।

चार जना केटीमध्ये दुइटीले ठिक्क पारिराखेको बिस्कुन (धान) सुकाउने। अनि दुइटीले ठिक्क पारिराखेको माटो खन्ने ।

सधवा स्त्री दुइटीमध्ये एउटीले चाहिं पहिल्यै ठिक्क पारिराखेको पीठो मुछ्ने र अर्कोले चाहिं यौटा साह्रो कसार र अरू साधारण कसार बटार्ने अर्थात् गणेश बटार्ने र कसार पनि बटार्ने । यसै गणेशलाई मातृकापूजा गर्दाको गणेशका साथ राखेर पूजा गरिन्छ र यसै गणेशलाई वर-पक्षले कलस्यौलीको कलशमा राखेर पठाउने र कन्यापक्षले चाहिं पछि छोरी अन्भाउँदा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आमाले धर्मगाँठो अर्थात् रुन्चेगाँठोमा जनै-सुपारी-चन्दन-राता अक्षता भेटीघाटीका साथ त्यो बटारे गणेशलाई पनि लगनगाँठोको खालीपट्टिको टुप्पोमा बाँधिदिनुपर्दछ ।।

सनाई बजाउनेमध्ये यौटाले लुगा सिउने अर्थात् सिइराखेको लुगामा सियो-धागो घुसारिटोपल्ने यानि लुगा सिउने । त्यसपछि यिनीहरू सबैलाई दक्षिणा बकस दिएर सगुन दन्यौरा-सेल-अनर्सा खान दिने ।।

अघि बाँधेको वरपक्षको भार बरियाँतका साथ लगिन्छ र दुलहीपट्टिकाको भारसँग भिडाइन्छ अर्थात् जोरिन्छ । यो भार बोकेर लानेलाई भारबोकुवा भन्दछन् र ग्रहशान्तिको झल्लरे कलश बोकेर लग्ने आइमाईलाई कल्स्यौली भनिन्छ र उसले कन्याकहाँ पुऱ्याएपछि दुलहीपट्टिको कलशमा जोराउँछे । यसरी कलश लानेलाई कल्स्यौली, कौतुकागारबाट सिँगारिएकी वधूलाई थेग दिएर विवाह-जग्गेमा ल्याउने नारीलाई लोकन्ती भनिन्छ र त्यै लोकन्ती जग्गेमा (माडोमा) वधूलाई थेग दिएर घुमाउँदा मङ्ल्यौली कहलाउँछे । जग्गेको

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काम सकिएपछि फेरि लोकन्ती नै कहिन्छे र वधू बिदा गर्दा साथीका लागि वधूसँगै वरको घरसम्म जान्छे र दुरान फर्काउन आउँदा साथै आउँछे अनिपछि मात्रै आफ्नू पुरानै नाउँ धार्छे ।

लानु-बाहेक पूर्वाङ्ग-मातृका-नान्दी-ग्रहशान्तिको विधिविधान दुवै-पट्टि उस्तै-उस्तै हो ।।

४. मण्डप-निर्माण

आफ्नू घरको आँगनमा वा अनुकूल ठाउँमा बढारकुँढार पारी, गाईको गोबरले लिपपोत गरी या पक्की भए धोईपखाली चचार हात या पपाँच हात लम्बाचौडा ठाउँको चारै कुनामा लामा बाँस र केराका थाम जोरेर लिङ्गा गाड्नू र पूर्वपटिको दुई लिङ्गाको बीचमा अर्को पनि त्यस्तै लिङ्गो गाड्नू । अनि उभिदा टाउकोले नछोइने गरी दाइने पारी तीन फेरा तोरण (पीपलका, आँपका पाए अशोकका पातहरू तथा फूलहरू बाक्लै हुने गरी घुसारेको पातलो खिरिलो डोरीविशेष) ले बेर्नू । अनि होमवेदीको सोझै माथि पर्ने गरी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तोरणभन्दा माथि झालर भएको चँदुवा टाँग्नू र त्यसमाथि कसार दन्यौरा जनै सुपारी दक्षिणा फूलहरू लाजाहरू पनि राखिदिनू । अनि झालरको ठीक तल मण्डपको बिचोबीचमा एकेक हात लम्बाचौडा चार अमल अग्लो; पूर्वाङ्गमा खनेको माटो मिसाई; माटोको वेदी बनाउनू । पूर्वपटिको उत्तरपट्टि रहेको लिङ्गोको तल भित्रपटि ग्रहपूजाका लागि यौटा सानू एकबित्ते अर्को वेदी पनि बनाउनू । अनि अग्निस्थापनामा देखाइएको जस्तो गरी विधिपूर्वकको रेखी हालेर त्यसै गरी यथायथास्थानमा कलशादिहरू पनि स्थापना गर्नू। यसैलाई मण्डप (माडो वा जग्गे) भन्दछन् ।।

५.साइपाटो (साइतपत्र) पठाउँदा

वर-कन्या दुवैपटिको पूर्वाङ्ग-मातृकापूजा-नान्दीश्राद्ध एकैचोटि गर्नुपर्ने हुनाले पूर्वाङ्गको पहिल्यै दिन पुग्ने गरी या पुऱ्याउन जानेहरू फर्केर आइपुग्ने गरी वर-पक्षबाट कन्यापक्षमा पठाइने पूर्वाङ्गको साइत र कन्यादानको समय किटिएको

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पत्रलाई 'साइपाटो' भनिन्छ । ग्रहशान्ति चाहिँ वरपक्षले वर अन्भाउने दिन र कन्यापक्षले विवाहकै दिन गरे पनि हुन्छ । अथवा वरपक्षले टाढा जानुपर्ने भए जाने अघिल्लै दिन गरे पनि हुन्छ ।

साइपाटो पठाउँदा पाँचोटा वा सातोटा वा एघारोटा थिजोर मयाँ ठक्की या किस्तीमा प्रत्येकमा सुकखा मसला अर्थात् सिङ्गा मरिचल छुर, सिङ्गा ओखर छुर, केही छोहोडा-मिश्री-कागजी बदाम-काजु-सुखा मिठाई वा सेल-अनर्सा-केरा जोडा र अरू अरू पनि फलहरू फूलहरू राखेर अनि साइतपत्र राखेकोमा विशेष अबीर-लावाहरू राखेर ती सबै किस्तीलाई निट्ठा रातो रुमालले छोपी माथिबाट अबीर लावा निकै-निकै छरी फूलहरू राखी योटा राम्रोचाहिँमा निक्खर सेतो कागजमा रातो मसीले (अमुकको ठाउँमा सही शब्द) लेखेको (भरेको) पत्र-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

।। श्रीमङ्गलमूर्तये नमः ।। श्रीगणेशाय नमः ।।

आदित्यादिग्रहाः सर्वे ज्योतिश्चक्रनिवासिनः ।
कुर्वन्तु दीर्घमायुष्यं यस्येयं लग्नपत्रिका ।।

अमुक........प्रान्ते (अञ्चले) अमुक........जनपदे (जिल्लायाम्) अमुक........ग्रामे (वसतौ) निवासिनः अमुक........गोत्रस्य अमुक........प्रवरस्य अमुक.......वेदाध्यायिनः अमुक.......शर्म्मणः प्रपौत्रस्य अमुक........शर्म्मणः पौत्रस्य अमुक .... शर्मणः पुत्रस्य तथा अमुक........प्रान्ते (अञ्चले) अमुक........जनपदे (जिल्लायाम्) अमुक........ग्रामे (वसतौ) निवासिनः अमुक........गोत्रस्य अमुक........प्रवरस्य अमुक........वेदाध्यायिनः अमुक........शर्म्मणः प्रपौत्र्याः अमुक........शर्मणः पौत्र्याः अमुक........

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शर्म्मणः पुत्र्याः करिष्यमाणे विवाहकर्मणि लग्नपत्रम् -

श्रीशाके........संवत्........मासे........गते........पक्षे........तिथौ ....वासरे........श्रीसूर्योदयाद्-गतघटी........पलेषु........अस्मिन् समये........लग्ने........नवांशके दधिमत्स्येक्षुदण्डादीनि शुभशकुनानि सम्पाद्य प्राङ्गणे द्वारबहिर्वा श्रीगणेशपूजनपुरस्सरं युगपदेव घटीस्थापनं गणेशलड्डूकरणं भारबन्धनं वेदीनिर्माणाय मङ्गलमृत्तिकाखननम्, धान्यविकिरणम् वस्त्रच्छेदनम् तथा प्रकोष्ठे पूर्वमुखः सन् मातृकापूजनम् - नान्दीश्राद्धं च विवाहदिने अथवा तत्पूर्वदिने पूर्वाङ्गं कुर्यात् । पुनस्तस्मिन्नेव दिने वा श्वोदिने मासे........पक्षे ....तिथौ........ नक्षत्रे........ सौरेण........गतदिनेषु........श्रीसूर्योदयाद् गतघटी........पलेषु........तदनुसार घण्टा........मिनट........अस्मिन् समये........लग्ने........नवांशके उभयपक्षीयत्रिपुरुषशाखोच्चारण-पूर्वकं कन्यादानं लग्नग्रन्थिकरणं पाणिग्रहणं गोदानं च स्वगृह्योक्तविधिना उत्तरमुखेन
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
कन्यापित्रा पश्चिममुखीं कन्याम् पूर्वमुखाय वराय दानकरणं शुभं भूयात् ।।

राखी राम्रोसँग पूजा गरी पट्ट्याएर बीचमा राखी त्यस किस्तीलाई सबै साइपाटेका अगि लाएर कन्याकहाँ पठाउनुपर्दछ । पत्र पुऱ्याउनेहरूले त्यो पत्र कन्याका अभिभावकलाई जिम्मा लगाई त्यसबाट साइतपत्र मात्रै लगेर कन्यालाई सुनाइदिनुपर्छ र अघिकै ठाउँमा फर्की उनीहरूकै यौटा पात्रमा आफ्ना सबै ढक्की वा किस्तीबाट अलि-अलि मसाला झिकेर हालिदिई पुऱ्याएको पत्र त्यसै पात्रमा राखी कन्याको प्रमुख अभिभावकलाई जिम्मा लाइदिनुपर्छ र अभिभावकले साइपाटेहरूलाई टीकाटाला गरी ख्वाइ-प्याइ-सकेपछि साइपाटाका वस्तुको पूरै अथवा सक्तो केही निष्क्रय (दस्तूर) ढक्की-ढक्कीमा राखिदिए-पछि ती ढक्की लिएर जाने साइपाटेहरू सरासर वरकहाँ फर्कनुपर्छ ।।

साइपाटेहरू फर्की आइपुगेपछि बरियाँती पुग्ने समय राखेर वरपक्षले पूर्वाङ्ग-मातृकापूजा-नान्दीश्राद्ध सकी हिजै बनाइराखेको मण्डप (जग्गे)मा गई ग्रहशान्ति कर्म सकी ब्राह्मणहरूलाई भोजन गराई अनि सकेदेखि जन्त जाने-हरूलाई पनि ख्वाई-प्याई, नसके धमेना गराई टीका माला लाइदिई आफूहरूले

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पनि खाई-पिई ब्यौलोलाई निधारभरि पहेँलो चन्दनको अलग-अलग गरी ठाडा बाक्लै टीकाले सिँगारी, पोशाक पहिराई, फेटा गुताई, फेटामा कल्की देखिने गरी माहुर (आधा ताउ नेपाली सेतो कागजलाई, नपाए देशी कागजलाई नै बीचमा मोडी अनि ठाडो चार पत्र पट्ट्याई लम्बाइपटिको टुप्पोमा पानको पात जस्तै जत्रै पारी नछुट्टिने गरी घाँटी राखी काटी पात बनाई त्यस पातको बीटभरि आराको दाँती जस्तो पारी दाँती बनाई ती दाँतीलाई रातो मसीले रङाई पछिल्लोपल्टको पट्ट्याइलाई मात्र उघारी पातको बीचमा रातोले स्वस्तिक चिह्न 卐 बनाइएको कल्की-विशेष) फेदपटिबाट निकै घुसारी अनि आमाले छोरो ब्यौलोलाई दैलो (सँघार)मा उभ्याई रातो अछेताको टीका लाइदिई दही चटाई पाल्की वा डोली वा घोड़ा राखेको ठाउँमा पुऱ्याई राता अछेता छर्दै तीनपल्ट दायाँ परिक्रमा गराई रमाउँदै पाल्की (सवारी)मा बसाइ-दिनुपर्छ वा डोलीमा लेटाइदिनुपर्छ वा घोड़ा भए घोड़ामा चढाइदिनुपर्छ र बाजागाजालाई अगि लाई, जन्तीहरूलाई पछि-पछि लर्को लगाई बिदा गरिदिनुपर्छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कन्याको घरनेर पुग्न लागेका जन्तीहरूले पहिले आफूमध्येबाट दुई जना अलि चलाख र हिडाका पट्ठालाई 'यति जन्ती आएका छन्' भनी सूचना दिन कन्याकहाँ भत्करुहरू पठाउनुपर्छ र सरासर बरियाँती लिएर जानुपर्छ। कन्याकहाँ पुगेपछि कन्यापक्षीयहरूले सबारीसहितको ब्यौलोलाई राता अक्षता छर्कंदै तीनपल्ट दायाँ प्रदक्षिणा गरी, सवारीबाट ब्यौलोलाई ओराली वरणी गर्ने ठाउँमा लानुपर्छ र विधिपूर्वक वाग्दानपूर्वकको वरणी गर्नुपर्छ ।

वरणी सकेर कन्यादानको बेला अलि परै भए वरकै कल्स्यौलीका साथै बसाएर ब्यौलोलाई भुँडे (डबल) भागसहित र अरू जन्तीहरूलाई पनि भोजन गराई अनि कन्यादान गर्ने ठाउँमा वरलाई लगी कन्यादान गर्नुपर्छ । कन्यादानको शुभलग्न अलि अबेरै भएदेखि गोड़धुवा लिएर कुमार वर र कुमारी कन्याको गोडा धुन अर्थात् वर-कन्याको गोडा धुन बिहानैदेखि भोकै बसेका घरगाउँले -लाई छुट्टी दिनका लागि गोडधुवासम्मको विधिकार्य सकेर वर-कन्यालाई आ-आफ्नै ठाउँमा पठाएर अथवा त्यहीँ पर्खाइराखेर गोडा धुनेहरूलाई पनि खुवाइपियाइसकी वा खान-पिउन पठाई बाँकी काम कन्यादानकै वेलामा गरी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कन्यादानको कार्य सकिएपछि ब्यौलीलाई शृङ्गारकोठा (कौतुकागार) मा लगी उसलाई वरपटिका लुगा गहना लगाइदिई अथवा वरपटिको दुपट्टा मात्रै ओढाई लगनगाँठोको गाँठो कम्मरमा रहने गरी अर्को छेउ लामै फुर्को छाडी कम्मरमा बाँधिदिई सखीहरूले अँगालिएकी अनि लोकन्तीले समाइएकी तथा वरले पछाडिबाट लगनगाँठो पक्रिइएकी वधूलाई बिहे गर्नका लागि बिहानकै कन्यापक्षीय जग्गेमा पठाइदिनुपर्छ र जग्गेलाई दायाँ पारी गएर जग्गेको दक्खिनपटि बिछ्याइराखिएको बिछलौनामा पछि ठाउँ नसारुन्जेलसम्म वधूलाई दायाँ र वरलाई बायाँ पारी दुवैलाई उत्तर-मुख फर्काएर बसाउनू र अब जग्गेमा गर्नुपर्ने काम वरपक्षीय पुरेतले त्यो कन्यापक्षीय जग्गेलाई संकल्पपूर्वक निखन्याएर वरपक्षीय पारी आफ्ना पटिका ब्राह्मणहरूलाई वरण गराई अनि अगाडिको बिहे गराउने काम वरपक्षीय पुरोहितले नै गराउनुपर्छ । अनि बिहा सकिएपछि वधूलाई वधूको कौतुकागारमै पठाउनुपर्छ र त्यसपछि वधूलाई वधूकी आमाले छोरी अन्भाउने काम गरिन्छ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

६.आमाले छोरी अन्भाउँदा

आमाले छोरी अन्भाउँदा मातृकापूजा गरेको ठाउँमा वर-वधूलाई लगेर लगनगाँठोको फुकापटिको टुप्पोमा पहिले पूर्वाङ्ग गर्दा बटारेको र गणेशका साथ राखी पूजा गरिएको गणेश राखी त्यसमाथि जनै-सुपारी-पैसा-रातो चन्दन-रातो अक्षता-फूल हाली गाँठो पारेको धर्मगाँठो अर्थात् रुन्चेगाँठो बाँधिदिनू र त्यहाँ पूजिएका देवताहरूलाई राता चन्दन-राता अक्षता-फूल छर्केर पूजा गरी अनि वर-वधू दुवैलाई दैलो (सँघार)मा उभ्याएर दुवैलाई रातो अक्षताको टीका लाइदिएर दुवैलाई अलि-अलि दही खुवाएर अनि रातो चन्दन-रातो अछेता-फूल-सिङ्गो सुपारी हात-हातमा राखिदिएर- 'लौ, ज्वाइँ नानी ! मैले मेरी छोरी आजदेखि तपाईँलाई जिम्मा लाइदिएँ, अर्काकी छोरी ठानेर हेलाँ नगर्नुहोला, आफ्नै धर्मपत्नी ठानेर सिहार-सम्भार, पालन-पोषण गर्नुहोला; ''मारे पाप, पाले पुण्य'' भन्दै' छोरीलाई पाखुरामा समातेर लगी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथवा दाजु-भाइ या बाबुको बुईमा बोकाएर लगी सवारीलाई राता अक्षता छर्दै तीनपल्ट दायाँ परिक्रमा गराई डोलीमा या पालकीमा वा घोडामा चढाइदिनू र सुँकसुँकाउँदै फर्कनू । अनि जन्तीहरूले बाजागाजाका साथ वर- वधूलाई लिएर रमाउँदै वरको घरतिर जान प्रस्थान गर्नू ।।

७.वरका दिदी-बहिनीले अर्तिसियाँली गर्दा

ब्यौली घर पुगेपछि वरका दिदी-बहिनीले ब्यौलीलाई डोली वा सवारीबाट ओराल्ने, थालमा बालेका बत्तीहरूले वरिपरि तीनपल्ट दायाँ परिक्रमा गर्दै आरती उतार्ने (गर्ने), अनि त्यसै ठाउँदेखि मातृकापूजा गरेको ठाउँसम्म मूढ़ हात जति पर-पर दुई-दुई मूठी गरी थुप्र्याएको धानको थुप्रोमाथि खोरीमा बालेको बत्ती प्रत्येक पाइलाले कुल्चाउँदै निभाउँदै दुलहीलाई पाखुरामा समातेर मातृकापूजा गरेको ठाउँमा लाने र उहाँ दुवै सासू-बुहारीले रातो चन्दन-रातो अक्षता-फूलहरू पहिले पूजित देवताहरूलाई चढ़ाएर सप्तघृतमातृकाको माथिबाट

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सासू-बुहारीले परस्परमा चुल्ठो जोरेर- 'ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्त्रधारं देवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः।। ले घृतधारा गर्ने अर्थात् घृतमातृकामाथि पर्ने गरी घिउको धारा चुहाउने ।।

त्यसपछि यौटा फराक भाँडामा एक पाथी धान राखी त्यसमा निकै जनै सुपारी पैसाहरू मिसाउने र त्यो धान दुवैले एकैचोटि पाथीमा भर्ने र त्यसै फराक भाँडामा खन्याउने र सासू-बुहारी दुवैले मिली पहिले मिसाएको जनै-सुपारी-पैसा सबै कसले धेरै पाउने भनी खोजाखोज गर्ने । त्यसपछि सासूले बुहारीलाई भँडार देखाइदिएर ठीक पारिराखेको ठाउँमा बसाई वरका दिदी-बहिनीहरूलाई दक्षिणा दिई चमेना गराइदिने । अनि रात परेपछि छोरा-बुहारीलाई ख्वाईप्याई सुत्ने ठाउँ खटाइदिने ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

८.चतुर्थी र द्विरागमन

विवाहको ठीक चौथो दिनमा, यसै विवाहपद्धतिको पुछारनेर छापिएको चतुर्थी कर्म विधिपूर्वक गर्नुपर्छ र विवाह गरेको सोह्र दिनभित्रै द्विरागन अर्थात् दोस्रोपल्ट माइतीबाट घर आउने काम जसलाई दुरान फर्काउने भन्दछन् गर्नुपर्छ ।

दुरान फर्काउँदा वर-वधू दुवै नै वर ससुराली तथा वधू माइत जानुपर्छ र एक-दुई रात उहीं बसी अनि घर फर्कनुपर्छ । अघि वधू अन्भाउँदा लोकन्ती पनि साथै आएकी भए ऊ पनि नफर्कने गरी साथै जान्छे। सोह्र दिनभित्रै द्विरागमन गरिराख्यो भने पछि-पछि आउन-जानलाई साइत हेरिरहनुपर्दैन। द्विरागमन गरेको छैन भने पछि माइत गएर फर्कनुपर्दा साइत जुराउन बडो कठिन पर्छ ।।

।। मेलोमेसो समाप्त ।।

तपाईंहरूको वशंवद :-

एकदेव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

।। श्रीगणेशाय नमः ।।

अथ स्वयंवरविधिः प्रारम्भः

पूजासामग्रीं सम्पाद्य आदौ कन्यायाः प्रायश्चित्तगोदानम् ।।

"नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः।।"इति गां संपूज्य; "नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।" इति द्विजं च सम्पूज्य; कुशादीन्यादाय पूर्वसङ्कल्पमुच्चार्य गोत्रोत्पन्ना देवी अहं भर्तृसहयोग-धर्म्यप्रजोत्पादनपूर्वक स्वगृह्योक्तविविध धर्माचरणाद्यधिकारसिद्धिपूर्वक श्रीमत्परमेश्वरप्रीतिफलकैतद्विवाहोपयुज्यमानवर्णवश्यतारायोनिग्रहमैत्र्यादिसंमेलनपूर्वक ग्रहानुकूल्यसंयोजनाद्यसुपलब्धिजनितसकलदोषनिवारकोऽऽचारपरम्पराप्राप्तस्वयंवरकर्मणि ज्ञाताज्ञात-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समस्तपापक्ष-यद्द्वाराऽधिकारसिद्धये तथाऽनाचरितानामप्याचरणीयानां तत्तन्नियमानामाचरितवत्त्वसिद्धिद्वारैतत्कर्मजन्यपूर्वनिर्दिष्ट-फलसिद्धये इमां गां रुद्रदैवताकां तत्प्रत्याम्नायीभूतं गोनिष्क्रयद्रव्यं रजतं चन्द्रदैवताकं अमुकगोत्राय शर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ।। कपिले० । अद्यकृतैतत्० ।।

अथ इन्द्राण्यादि-पूजनसङ्कल्पः कन्यायाः ।। कन्या कुशादीन्यादाय 'अमुक गोत्रोत्पन्ना अमुकीनाम्नी देव्यहं विधास्यमानविवाहपूर्वविधेय-स्वयंवरकर्मणि दीप-कलशगणेशपूजन-पुण्याहवाचनपूर्वकं शच्यादिदेवतापूजनं स्वयंवरणञ्च करिष्ये' इति सङ्कल्प्य, चन्दनाक्षतपुष्पादिना दीपं सम्पूज्य प्रार्थयेत् – 'नमोऽस्त्वनन्ताय सहस्रमूर्तये-सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते, सहस्र-कोटीयुगधारिणे नमः ।। दीपनारायणाय नमः।। अथ यथाविधि कलशं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्पूज्य प्रार्थयेत्-। 'वरुण त्वं महाभाग सर्वदेव- प्रपूजितः । वितते मम यज्ञेऽ स्मिन्नविघ्नं कुरु सर्वदा' ।। वरुणाय नमः।। ततः गणेशं यथाविधि सम्पूज्य प्रार्थयेत् - । 'वक्रतुण्ड महाकाय कोटि-सूर्यसमप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।। अविरलमदजलनि वहं भ्रमरकुलानीकसेवितकपोलम् । अभिमतफलदातारं कामेशं गणपतिं वन्दे' ।। श्रीमन्मङ्गलमूर्तये महागणाधिपतये नमः।।

ततः पुण्याहवाचनम् -।। वरणसामग्रीं समादाय अमुकगोत्रा अमुकनाम्नी देव्यहं मम स्वयंवरकर्मणि पुण्याहं वाचयितुमेभिर्गन्धाक्षतद्रव्य-वस्त्रादि-भिर्युष्मानहं वृणे ।। इति चतुरो ब्राह्मणान् वृत्वा कृताञ्जलिः-

अमुक गोत्रायाः अमुक नाम्नी देव्याः मम स्वयंवरकर्मणि (इति प्रतिवारमुक्त्वा) भो ब्राह्मणाः पुण्याहम् भवन्तो ब्रुवन्तु ३। ब्राह्मणाश्च– 'ॐ पुण्याहम् ३, ॐ पुनन्तु मा० (इति ब्राह्मणाः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

भो० ,, स्वस्ति भवन्तो० ३। ब्रा० ॐ स्वस्ति ३, ॐ स्वस्ति नऽइन्द्रो०
भो० ,, ऋद्धिम् भवन्तो० ३। ब्रा० ॐ ऋद्धिः ३, ॐ सत्रस्य०
भो ब्राह्मणाः वृद्धिं भवन्तो ब्रुवन्तु ३।
ब्राह्मणाश्च वृद्धिम् वृद्धिम् वृद्धिम् ३।ॐ वृद्धिः ३, ॐ ज्येष्ठयज्ञम०
भो० ब्राह्मणाः कल्याणम् भवन्तो ३, ब्रा०ॐ कल्याणम् ३, ॐ यथेमां =०
भो० शान्तिम् ,, ३। ब्रा०ॐ शान्तिः ३, ॐ द्यौः शान्ति०
भो० श्रियम् ,, ३। ब्रा०ॐ श्रीः ३, ॐ मनसः काम०

"मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव"।। इत्याशिषो गृहीत्वा ततोऽष्टदलं कमलं विलिख्य पूर्वादिक्रमेण कौसल्यां, सीतां, मन्दोदरीं, ताराम्, अञ्जनाम्, दमयन्तीम्, सुवर्चोवतीम्, नर्मदाम्, गङ्गाम्, गान्धारीम्, कुन्तीम्, द्रौपदीम्, सुभद्राम्, हिडिम्बाम्, छायाम्, रोहिणीम्, मित्राम्, बुद्धिमतीम्, सावित्रीम्, लक्ष्मीम्, उमाम्, रुक्मिणीम्, अनसूयाम्, अरुन्धतीं च सम्पूज्य मध्ये शचीं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यथासंपादितैरुपचारैः पूजयेत् ।। धूपदीपनैवेद्यादिनीराजनाऽन्तं पूजनं विधाय गृहीतपुष्पाञ्जलिः प्रार्थनां कुर्यात् -।। तत्र मन्त्रौ- 'देवेन्द्राणि नमस्तुभ्यं देवेन्द्र-प्रियवादिनि । विवाहभाग्यमारोग्यं पुत्रलाभं च देहि मे ।। धान्यं देहि धनं देहि पशून् देहीन्द्रभामिनि । यशो देहि सुखं देहि सर्वकार्यकरी भव ।। इति।।

ततो ज्योतिर्विदादिष्टे सुमुहूर्ते प्राप्ते दूर्वादिरचितां माङ्गलिकीं वरणस्रजं हस्ताभ्यां गृहीत्वा- 'देवेन्द्राणि नमस्तुभ्यं महालक्ष्मि नमोऽस्तुऽते । आवयोः प्रीतिरतुला त्वत्प्रसादात् सदा भवेत् ।। पाण्डवानां द्रुपदजा यथा सत्या पतिव्रता । वायोरप्यञ्जना देवी यथाच्छाया विभावसोः।। शन्तनोश्च यथा गङ्गा चन्द्रस्य रोहिणी यथा । रुक्मिणी वासुदेवस्य रामस्य जानकी यथा ।। धृतराष्ट्रस्य गान्धारी सावित्री ब्रह्मणो यथा । तथा भवेयं सततं त्वत्प्रसादात् पुलोमजे ।। सर्वे देवाश्च मुनयो मानवाः साक्षिणो मम । मनसा कर्मणा वाचा वृतोऽयं हि पतिर्मया'।। इति ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

ॐ भद्रं कर्णेभिः० आनोभद्राः० स्वस्तिनऽइन्द्रो०, मङ्गलं भगवान् विष्णुः०, इत्यादीन् मंगलमन्त्रान् पठत्सु द्विजेषु वाद्यमानेषु वाद्येषु तां वरण-स्रजं वरस्य कण्ठदेशे निदधीत ।। ततः पूजितानां देवानां विसर्जनं विधाय ब्राह्मणेभ्यः कन्याकुमारेभ्यश्च दक्षिणां दद्यात् । तत्र वाक्यम्- 'अमुक देव्याः मम अस्मिन् स्वयंवरकर्मणि कृतस्य दीपकलशगणेश- शच्यादिदेवतार्चनकर्मणः साङ्गतासिद्धिपूर्वक समीहितदाम्पत्यसुख-समृद्धि- सिद्ध्यै इमां भूयसीं दक्षिणां ननानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृजे' ।। इति दत्त्वा यस्य स्मृत्या० इति पठित्वा साञ्जलिरच्युतं प्रणम्य, अभिषेकं प्रसादञ्च वरपुरःसरं कन्या गृह्णीयात् ।। ततः कन्यावरयोरन्योन्याऽङ्गुलीयकमुद्राविनिमयं च कुर्यादाचारात् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

।। इति स्वयंवरविधिः समाप्तः ।।

अथ पटलाञ्छनविधिः

तत्र कन्या कुशादीन्यादाय – 'अमुक गोत्रायाः अमुक नाम्न्या देव्याः मम करिष्यमाणे विवाहकर्मणि प्राग्विधेयत्वेन शिष्टाचारपरम्पराप्राप्तं पटलाञ्छनकर्म दीप-कलश-गणेश-शचीपूजनपूर्वकमहं करिष्ये' ।। इति प्रतिज्ञाय, दीपादीनां पूजां विधाय, गृहीतपुष्पाञ्जलिः नमोस्त्वनन्ताय० इति दीपनारायणं च सम्पूज्य, 'वरुण त्वं महाभाग सर्वदेवप्रपूजित । वितते मम यज्ञेऽस्मिन्नविघ्नं कुरु सर्वदा' ।। इति वरुणम् ।। वक्रतुण्ड० इति गणेशं च सम्प्रार्थ्य, प्रसारिते सिततण्डुलपुञ्जेऽष्टदलकमलकर्णिकायां गन्धाक्षतपुष्पाण्यादाय- 'ॐशचि इहाऽऽगच्छ इह तिष्ठ यावत् पूजां करोमि तावत् त्वं सुस्थिरा वरदा भव' इत्यावाह्य आसनम्, पाद्यम्, अर्घ्यम्, स्नानम्, पञ्चामृतस्नानम्, शुद्धोदकम्, गन्धम्, अक्षतान्, पुष्पाणि,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिन्दूरम्, पिष्टातकम् (अबीर), अभ्रकम्, माल्यम्, धूपम्, दीपम्, नैवेद्यम्, पानीयम्, सौभाग्यद्रव्यम्, दक्षिणाम्, नीराजनं च शच्यै नमः, इति नाममन्त्रेण समर्प्य गृहीतपुष्पाञ्जलिः प्रार्थयेत् - तत्र मन्त्रौ - 'देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियवादिनि । विवाहभाग्यमारोग्यं पुत्रलाभं च देहि मे ।। धान्यं देहि धनं देहि पशून् देहीन्द्रभामिनि । यशो देहि सुखम् देहि सर्वकार्यकरी भव ।।' ततः सुमुहूर्ते वाद्यमानेषु वाद्येषु, पठत्सु मङ्गलान् वैदिकमन्त्रान् ब्राह्मणेषु कर्पूर-कुङ्कुम-कस्तूरीमिश्रितपीतचन्दनाक्तपाणिद्वया कन्या ईषद्विरलिताङ्गुलिपञ्चका वरपाणिलाञ्छनयोरधस्तात् श्वेतपटे शनैः शनैः लाञ्छनं कुर्यात् । तत्र मन्त्रौ - 'ॐ दक्षिणत उहैक उपदधाति तदेताः पुण्या लक्ष्मीर्दक्षिणतो दध्मः । तस्माद्यस्या दक्षिणतो लक्ष्म भवति तां पुण्यलक्ष्मीमाचक्षते ।। ॐ कुलायिनी घृतवती पुरन्धिः स्योने

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सीद सदने पृथिव्याः । अभित्वा रुद्रा वसवो गृहणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाऽध्वर्यूसादयतामिहत्वा' ।।२।। ततो दक्षिणासङ्कल्पः- । तत्र वाक्यम्- 'अमुक गोत्राया मम शिष्टाचारपरंपराप्राप्तविवाहप्राक्काल-विधेयपटलाञ्छनकर्माङ्गतया कृतस्य शच्यादिदेवता-पूजनकर्मणः साङ्गता-सिद्धिद्वारा यावदपेक्षितगार्हमेधिकसुखसमृद्धिसिद्धये न्यूनतादिरिक्तता-दोषपरिहाराय इदं दक्षिणाद्रव्यं रजतं चन्द्रदैवतम्० इत्यादि ।। ततो लब्धप्रसादकुसुमादिर्वधूः साञ्जलिः-'यस्य स्मृत्या०'-इत्यादि पठेदिति शिवम् ।।

।। इति पटलाञ्छनविधिः ।।

अथ वाग्दानसंक्षिप्तविधिः

ज्योतिर्विदादिष्टे शुभदिने कृतशकुनदर्शनाः सुवेषाः वरपित्रा, वरभ्रात्रा,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वरबान्धवेन येन केनाऽपि वा समेताः द्व्यादयोऽष्टपर्यन्ताः युग्माः ब्राह्मणाः कन्यागृहं गच्छेयुः। श्रावयेयुश्च कन्यापित्रादिकान् कन्याप्रार्थनावचनम्- 'मत्पुत्रार्थं मद्भ्रात्रर्थं मद्बन्ध्वर्थं मन्मित्रार्थं वा प्रयच्छ निजां कन्यां महाभाग !' इति ।। ततः कन्याप्रदः पित्रादिः स्वीकृतभार्याद्यनुमतिः उच्चैःस्वरेण त्रिवारं 'दास्यामि ३' इति उक्त्वा शुचिः प्रक्षालितपाणिपादः पूर्वाभिमुख उपविश्य आचम्य कुशादीन्यादाय देशकालौ स्मृत्वा 'अमुक शर्माऽहं दीपकलशगणेशपूजनपूर्वकमत्र करिष्यमाणकन्याविवाहाङ्गभूतं वाग्दानं करिष्ये' ।। इति संकल्प्य यथाविधि दीपादीन् षडङ्गरुद्राध्यायोक्तविधिना संपूज्य पुण्याहं च वाचयित्वा कन्यायाचकं प्राङ्मुखम् आसने उपवेश्य स्वयं तदग्रतः प्रत्यङ्मुख उपविश्य तं गन्धादिभिः समभ्यर्च्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धौतोत्तरीयाऽन्तरीय-नारिकेल-ब्रह्मसूत्र-हरिद्रा-पूगफल-ताम्बूल-

चन्दनाऽक्षत-दूर्वादल-पुष्प-द्रव्य-संभृतं पात्रं हस्ताभ्यामादाय 'अमुक गोत्रोत्पन्नाम् अमुकनाम्नीं पुत्रीम् अमुकनाम्नीं कन्यां ज्योतिर्विदादिष्टे सुमुहूर्ते दास्ये इति वाचा संप्रददे' इति तत्पात्रं दत्त्वा- "अव्यङ्ग्येऽपतितेऽक्लीबे दशदोषविवर्जिते । इमां कन्यां प्रदास्यामि देवाग्निद्विजसन्निधौ ।।" इति कृताञ्जलिः पठित्वा पुनः- "ॐ वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया । कन्यावलोकनविधौ निश्चितस्त्वं सुखी भव" ।। इति पठेत् ।। ततो वरपिता- "ॐ वाचा दत्ता त्वया कन्या पुत्रार्थं स्वीकृता मया । वरावलोकनविधौ निश्चितस्त्वं सुखी भव ।।" इति पठेत् ।। ततश्च सहाऽऽगतान् जनान् गन्धाऽक्षतताम्बूलदक्षिणादिभिः सत्कृत्य कन्यां च दध्यक्षतैः कुङ्कुमाक्तैरलङ्कुर्यात् ।। समागता ब्राह्मणा आशीर्मन्त्रान् उच्चार्य पुष्पप्रदानेन कन्यापितरं प्रतोष्य वरेण सह वरगृहम् प्रतिगच्छेयुः।। ततश्च कन्याऽपि प्रक्षालितपाणिपादा शुद्धासने उपविश्य आचम्य दीप-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कलशगणेशान् संपूज्य संप्रार्थ्य सिततण्डुलपुञ्जे शचीमावाह्य 'शच्यै नमः' इति नाममन्त्रेण पाद्यार्घ्याचमनीयगन्धाऽक्षताऽऽ दिभिर्नीराजनान्तैरुपचारैः संपूज्य, सोपायनद्रव्यं श्रीफलं हस्तयोर्गृहीत्वा प्रार्थयेत् -तत्र मन्त्राः- "इदं फलं मया देवि स्थापितं पुरतस्तव । तेन मे सुफलाऽवाप्तिर्भवेज्जन्मनि जन्मनि ।। देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि । विवाहभाग्यमारोग्यं पुत्रलाभं च देहि मे ।। धान्यं देहि धनं देहि पशून् देहीन्द्रभामिनि । यशो देहि सुखं देहि सर्वकार्यकरी भव ।। त्वदाराधनतः सर्वमलभ्यं नैव भूतले । तस्माद् देहि ममैश्वर्यं विपुलं वज्रिवल्लभे ।।" इति ।।

ततः सच्चरित्राः सुवासिन्यः समङ्गलगानं कन्यां नीराजयेयुः ।। ब्राह्मणाश्च- 'ॐ श्रीश्चते० ॐ कुलायिनी० ॐ मनसः कामम्० ॐ दीर्घायुस्त०' इत्यादि मन्त्रपाठान्ते कन्यकां प्रसादेनाऽलङ्कुर्युः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

।। इति वाग्दानविधिः ।।

अथ वरणी विधिः

भवनद्वारसमीपं समायाते वरे कन्याप्रदः (अकृतभोजनः) पित्रादिः स्वबान्धवान् आप्तानन्याँश्च सह कृत्वा सवाद्यं समङ्गलगानं कलशं सभारं पुरस्कृत्य गृहीतपर्युक्षणोपचारः स्वीकृतलाजाऽक्षतपुष्पादिसामग्रीकः वाहनस्थमेव सकलशं वरं सपर्युक्षणं कृत्वा त्रिः परिक्रम्य तिलकेनाऽलंकृत्य स्वकीयकलशे वरकलशेन संयोजिते वरं वाहनात् अवतार्य कलशयुगलं समङ्गलगानं पुरस्कृत्य सज्जीकृताऽर्चनोपचारां द्वारभूमिम् आनयेत्, पूर्वाभिमुखं च कारयेत् । स्वयं च शुद्धाऽऽसने प्रत्यङ्मुख उपविश्य आचम्य कुशादीन्यादाय– 'पूर्वसंकल्पमुच्चार्य अमुक गोत्रः अमुक शर्माऽहं अमुक नाम्न्याः कन्यायाः करिष्यमाणविवाहकर्मणि समागतस्य अमुक गोत्रस्य अमुक प्रवरस्य अमुक शर्मणो वरस्य दीपकलशगणेशपूजन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(वाग्दानपूर्वकं केचनाऽस्मिन् समये वाग्दानं कुर्वन्ति तद् वाग्दानविधौ द्रष्टव्यपूर्वकं यथासंपादितोपचारैः पूजनं करिष्ये' इति सङ्कल्प्य, यथाविधि अन्यान् दीप-कलश-गणेशादीन् संपूज्य वाग्दाने पूर्वमकृते वाग्दानविधिना वाग्दानं च कृत्वा पीतवस्त्राऽऽच्छन्नायां संभवतश्चम्पककाष्ठपीठिकायां वरं प्राङ्मुखमारोह्य स्वयं संमुखीभूय मध्ये पीतं पटं प्रसार्य बद्धाञ्जलिः स्वयमेवैतान् मन्त्रान् पठेत् (आचार्यं वा पाठयेत्), "ॐ नमः श्रीपते नाथ नमस्तुभ्यमुमापते । गजवक्त्र नमस्तुभ्यं भारति त्वां नमाम्यहम् ।। ॐ स्वति नवग्रहाः स्वस्ति स्वस्ति नारायणः सदा । स्वस्ति सुरेश्वर इन्द्रो द्यौर्भूमिर्वायुः स्वस्तये ।। ॐ स्वस्ति वैश्वानरः स्वस्ति विश्वेदेवाश्च स्वस्तये । स्वस्ति रुद्रः पिता स्वस्ति स्वस्ति कर्ता महेश्वरः ।। ॐ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वस्ति वायुर्धनं स्वस्ति स्वस्ति दाता नृपः स्वयम् । स्वस्ति श्रीगणपतिश्चैव

स्वस्ति श्रीर्माधवप्रिया ।। ॐ प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नो वृद्धिः।। अथ वरं वृणीते श्रियः प्रयाणे सुखाय कल्याणं धर्मार्थ-काममोक्षरतो देवाय दातव्यम् । अविरलसन्तानचिरजीविनं सुखाय विन्दानं सुतवर एवं कामान् यस्तु वरः ।। प्रियसावित्रीं गुणसंयुक्तां दोषरहितां बहुकुलनिर्मलसंयुक्ताम् । तुष्यन्ति देवता मातृगणो वरोऽभिषिक्ते दीर्घमायुः स्वस्ति व्रता ब्रूहि ।। आवाहयाम्यहं देवं सुन्दरं कामरूपिणम् । मम पापविनाशाय प्रजापतेति च क्रमात् ।। ॐ प्रजापते नत्वदेतानन्यो विश्वारूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्तु वयँ स्याम पतयो रयीणाम् ।। हिमाचलो यथा देवं रुद्रमावाहयत् पुरा । तथा भवन्तं प्रवरं वरमावाहयाम्यहम् ।। ॐ नमस्ते रुद्रमन्यवऽउतो तऽइषवे नमः । बाहुभ्यामुतते नमः ।। त्वं च ब्रह्मा त्वं च विष्णुस्त्वं च देवो महेश्वरः । आगच्छन् दिव्यमूर्तिस्त्वं सर्वपापहरो भव ।। ॐ असङ्ख्याता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

सहस्राणि ये रुद्रा अधिभूम्याम् । तेषाꣳ सहस्रयोजनेवधन्वानि तन्मसि ।। धर्मदं मोक्षदं चैव सर्वारिष्टविनाशनम् । नारायणस्वरूपस्य पश्यामि वदनं तव ।। ॐ अथ व्वरं व्वृणीते बलबद्ध वै देवा ऽएतस्य ग्रहस्य होमं प्रेप्सन्ति तेस्मा ऽएतं व्वरं समर्द्धयन्ति क्षिप्रे न ऽइमं ग्रहं जुहवदिति तस्माद् वरं व्वृणीते ।।१।। अथ व्वरं व्वृणीते यꣳ हवैक च सुषुव्वाणो व्वरं व्वृणीते सोऽस्मै सर्वः समृद्ध्यते तस्माद्वरं वृणीते।।२।। अथ व्वाराह्या ऽउपानहाऽ उपमुञ्चते । अग्नौ ह वै देवा घृतकुम्भं प्रवेशयाञ्चक्रुस्ततो वराहः सम्बभूव तस्माद्वराहो मेदुरो घृताद्धि सम्भूतस्तस्माद्वराहे गावः सञ्जानते स्वमेवैतद्रसमभिसञ्जानते । तत्पशूनामेवैतद्रसे प्रतितिष्ठति तस्माद्वाराह्या ऽउपानहा ऽउपमुञ्चते ।।३।। स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास, तस्माऽ आसनमाहृत्योदकमाहारयाञ्चकाराथ हास्माऽअर्घं चकार तꣳ होवाच व्वरं भवते गौतमाय दद्म इति ।।४।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स होवाच प्रतिज्ञातो म ऽएष व्वरो यां तु कुमारस्यान्ते व्वाचमभाषथास्तां मे ब्रूहीति ।।५।। स होवाच दैवेषु वै गौतम तद्वरेषु मानुषाणां ब्रूहीति ।।६।। स होवाच व्विज्ञायते हास्ति हिरण्यस्योपात्त गोऽअश्वानां दासीनां प्रवराणां परिधानानां मा नो भवान् बहरिनन्तस्या पर्यन्तस्याभ्यवदान्यो भूदिति, स वै गौतम तीर्थे नेच्छासा इति, उपैम्यहं भगवन्तमिति, व्वाचा ह स्मैव पूर्वऽउपयन्ति सहोवायनकीर्ताऽउवाच ।।७।। ॐ असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः । ये चैन ँ्ँ रुद्रा ऽअभितो दिक्षु श्रिताः सहस्रशो वैषा ँ्ँ हेड ऽईमहे ।।८।।

ततः पीतपटमपसार्य- 'ॐ अर्चयिष्यामो भवन्तम्' इति कन्याप्रदो ब्रूयात् । 'ॐ अर्चय' इति वरः प्रतिब्रूयात् ।। ततः –'ॐ यानि कानि च पापानि ब्रह्महत्यासमानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।' इति वरं त्रिः परिक्रम्य अञ्जलिं बद्ध्वा प्रार्थयेत् - 'ॐ आगतोऽसि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वरश्रेष्ठ सर्वकामार्थसिद्धये । प्रतिग्रहसमर्थोऽसि अर्घ्यं गृहण नमोऽस्तु ते ।।' इति ।। गृहणामीति वरेणोक्ते तदञ्जलौ क्रमेण विष्टरं, चन्दनम्, अक्षतान्, विविधानि पुष्पाणि, जाति-चम्पक- आम्र-अश्वत्थ-वट-उदुम्बर-पल्लवान्, पञ्चरत्नानि, गङ्गोदकम्, यवान्, कर्पूरम्, पूगीफलम्, ताम्बूलम्, दूर्वाङ्कुरान्, ससर्षपान् लाजान्, नारिकेलफलं, सुगन्धि- द्रव्यम्, द्रव्यं च समर्प्य दधि-मधु-घृत-पुष्पाक्षत-गङ्गोदक-कुशखण्डसहितं शङ्ख-रूपमर्घ्यपात्रं हस्ताभ्यामादाय वरस्य नाभौ, हस्तयोः, हृदि, स्कन्धे, शिरसि, पादयोः, जानुनोः, उदरे चाऽर्घ्यं दत्त्वा, ''ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये, सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते, सहस्रकोटी-युगधारिणे नमः।।'' इति पठन् चन्दनाक्षतमाल्यैर्वरं पूजयेत् ।।

ततः वरणसामग्री गन्धाऽक्षतपुष्पपूगीफल-स्वर्णद्रव्ययज्ञो-पवीतताम्बूलपादुकोपानह-पुष्पमालोष्णीषधौतान्तरीयोत्तरीय-कुण्डलाऽ-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ङ्गदग्रैवेयक (कण्ठिका मुद्रिकादिकां) हस्ताभ्यां गृहीत्वा - ''एभिर्यथाशक्त्युपकल्पितैर्गन्धाक्षत - पुष्प - पूगीफल-द्रव्य-यज्ञोपवीतादिभिर्द्रव्यैः करिष्यमाणकन्यादानप्रतिग्रहार्थम् अमुक गोत्रम् अमुक प्रवरम् शुक्लयजुर्वेदान्तर्गत-माध्यन्दिनीय-शाखाध्यायिनं वा अमुक शाखिनं वा शर्माणम् कन्यार्थिनं त्वामहं वरत्वेन वृणे'' इत्युक्त्वा अमुक वरहस्तयोः समर्पयेत् ।। वरश्च 'वृतोऽस्मि' इति प्रतिब्रुवन् तत्सर्वं स्वीकुर्यात्, यथायोग्यं मुद्रिकोत्तरीयादिकं परिदध्याच्च ।। ततो वरः पुष्पादिकमादाय- ''ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्व्वोढा नड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतां निकामे निकामे नः पर्जन्यो व्वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्'' ।। इति पठित्वा कन्यापित्रे आशीः प्रसादं समर्पयेत् ।। ततः कन्यापिता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वरस्य दक्षहस्ताऽङ्गुष्ठं गृहीत्वा - 'दूरदेशाऽऽगतो भद्र शान्तिक प्रिय-दर्शन । कालक्षेपो न कर्त्तव्यो लग्नवेला प्रवर्तते'।। इति पठित्वा तं पीठादुत्तारयेत् ।। ततश्च तं यानमारोह्य जनवासं (वरयात्रिकजनस्थानं) प्रापय्य यथासुखं विश्रामयेत् ।। ततश्च सवरान् वरयात्रिकान् यथोत्साहं यथावैभवं मिष्टान्न-भोजनादिना सत्कुर्यात् ।। भोजनस्थानगमनसमये भोक्तुमाहूतो वरः स्वकीयं कलशं दधिमन्थनीं पात्रीं (भारं) च पुरस्कृत्य गच्छेत् । कलशवाहिन्या अनुमतिं प्राप्य भुञ्जीत इति शिष्टाचारः ।।

।। इति वरणीविधिः ।।

अथ कन्यादानविधिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ कन्याप्रदः कृतवरणीकृत्यः यथासमयं कन्यादानस्थानम् आगत्य

कन्यां वरञ्च तत्र आनीय सज्जीकृतयोः (सजाइएको) मञ्च (मेच) योः कन्याम् प्रत्यङ् (पश्चिम) मुखीम् तथा वरं प्राङ् (पूर्व) मुखं कृत्वा उपवेशयित्वा (बसाएर) अथवा सौकर्यार्थं (सजिलोका लागि) वरं वधूं च सज्जीकृतायां खट्वायां पर्यङ्के वा पूर्वाभिमुखौ उपवेश्य (बसाएर) स्वयम् कन्याप्रदस्तु शुक्लाम्बरधरः शुचिः प्रक्षालितपाणिपादः समाहितचेताः सपत्नीकः प्रत्यङ्मुख उपविश्य कन्यावामे प्राङ्मुखं निविष्टम् ऊर्ध्वजानुं वरं संबोध्य- 'ॐ साधु भवानास्तामित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप् छन्दः यजुः ब्रह्मा देवता वरार्चने विनियोगः'। 'ॐ साधु भवानास्ताम्, अर्चयिष्यामो भवन्तम्' इति ब्रूयात् ।। वरश्च 'ॐ अर्चय' इति प्रतिब्रूयात् ।। 'विष्टरो विष्टरो विष्टरः' इति कन्यापक्षीयाः ब्रूयुः । 'ॐ विष्टरः प्रतिगृह्यताम्' इति कन्याप्रदः । वरः 'ॐ विष्टरं प्रतिगृहणामि' इति उक्त्वा विष्टरं प्रतिगृह्य, 'ॐ वर्ष्मोस्मीत्याथर्वण ऋषिः अनुष्टुप् छन्दः विष्टरो देवता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आत्मस्तुतिपूर्वकोपवेशने विनियोगः।'

'ॐ वर्ष्मोऽस्मि समानानानुद्यतामिव सूर्यः, इमं तमभितिष्ठामि यो मा कश्चाभिदासति ।।' इति पठन् उत्तराङ्गं विष्टरं स्वाऽऽसनादधः स्थापयेत् ।। ततः 'पाद्यम्-पाद्यम्-पाद्यम्' इति कन्यापक्षीयैः उक्ते कन्याप्रदः अञ्जलौ पाद्यं कृत्वा, 'ॐ पाद्यं प्रतिगृह्यताम्' इति वदेत् । वरः 'ॐपाद्यं प्रतिगृह्णामि' इत्युक्त्वा दातुरञ्जलेः पाद्यं निजाञ्जलौ प्रतिगृह्य- 'ॐ विराजोदोहोसीति प्रजापतिर्ऋषिरापोदेवता यजुः पादप्रक्षालने विनियोगः ।' "ॐ विराजोदोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः ।।" इति मन्त्रेण स्वयमेवस्व- दक्षिणं पादं प्रक्षाल्य मन्त्राऽऽवृत्त्या वामं पादं प्रक्षालयेत् । (क्षत्रियादिवरश्चेत् पूर्वं वामं पादं प्रक्षाल्य दक्षिणं पश्चात् प्रक्षालयेत्) ततः 'अर्घोऽर्घोऽर्घः' इति कन्यापक्षीयैरुक्ते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दूर्वाक्षतचन्दन-जलादिपूर्णं शङ्खार्घ्यपात्रं हस्ताभ्यामादाय कन्याप्रदः- 'ॐअर्घ्यः प्रतिगृह्यताम्' इति वदेत् । वरः- 'ॐ अर्घ्यं प्रतिगृहणामि' इत्युक्त्वा- "ॐ आपःस्थेति प्रजापतिर्ऋषिरापोदेवता यजुः अर्घ्यग्रहणे विनियोगः ।' "ॐ आपः स्थ युष्माभिः सर्वान् कामानवाप्नवानि ।।" इति पठन् अर्घ्यं गृहीत्वा किञ्चित् पुष्पादिकं शिरसि धृत्वा- 'ॐ समुद्रं वः प्रहिणोमीत्याथर्वण ऋषिः अनुष्टुप् छन्दः अर्घ्याभिमन्त्रणे विनियोगः।' "ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत, अरिष्टा अस्माकं वीरा मा परासेचि मत्पयः ।।" इति पठन् अर्घ्यपात्रम् ऐशान्यां दिशि असञ्चरे (जनगताऽऽगतवर्जिते अघचनाम्नि प्रदेशे) स्थापयेत् ।।

ततः -'आचमनीयम् आचमनीयम् आचमनीयम्' इति कन्यापक्षीयैरुक्ते आचमनीयम् आदाय कन्याप्रदः - 'ॐ आचमनीयं प्रतिगृह्यताम्' इति वदेत् । वरः- 'ॐ आचमनीयं प्रतिगृहणामि' इत्युक्त्वा बाह्ये तीर्थे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आचमीनीयं धृत्वा- 'ॐ आमागन्निति परमेष्ठी ऋषिः आपो देवता बृहतीच्छन्दः आचमने विनियोगः ।' ॐ आमागमन्ता यशसा सᳫ सृज व्वर्चसा, तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टि तनूनाम्।।' इति सकृत् आचम्य द्विवारं तूष्णीमाचामेत् ।। ततः 'मधुपर्को मधुपर्को मधुपर्कः' इति कन्यापक्षीयैरुक्ते कांस्यपात्रे निहितानां कांसयपात्रेणैव पिहितानां च दधि- मधु-घृतानां समष्टिर्मधुपर्कः- इति संज्ञाकं मधुपर्कं हस्ताभ्यां गृहीत्वा कन्याप्रदः - 'ॐ मधुपर्कम् प्रतिगृह्यताम्' इति वदेत् । वरः- 'ॐ मधुपर्कं प्रतिगृहणामि' इत्युक्त्वा - 'ॐ मित्रस्य त्वेति बृहस्पतिर्ऋषिः मधुपर्को देवता यजुः मधुपर्कविक्षणे विनियोगः ।' 'ॐ मित्रस्य त्वा चक्षुषा समीक्षे' इति तत्क्षणदूरीकृतपिधानपात्रं कन्याप्रदकरस्थं मधुपर्कम् अवेक्ष्य- 'ॐ देवस्य त्वेति परमेष्ठी ऋषिर्गायत्री छन्दः सविता देवता मधुपर्कग्रहणे विनियोगः ।' ''ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूष्णो हस्ताभ्याम्, अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि ।।' इति मधुपर्कं प्रतिगृह्य वामहस्तेन गृहीत्वा- 'ॐ नमः श्यावेति प्रजापतिः ऋषिः सविता देवता यजुः मधुपर्काऽऽलोडने विनियोगः ।' "ॐ नमः श्यावास्यायान्नसने यत्त आविद्धं तत्ते निष्कृन्तामि ।।" इति दक्षहस्तस्याऽनामिकया त्रिरालोड्य (फेटेर)अनामिकाऽङ्गुष्ठाभ्यां भूमौ त्रिर्निरुक्ष्य (छकेर)-'ॐयन्मधुन इति कुत्सऋषिर्मधुपर्को देवता जगतीच्छन्दः मधुपर्कप्राशने विनियोगः।' "ॐ यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यम्, तेनाऽहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादोसानि ।।" इति मन्त्राऽऽ वृत्त्या त्रिः (३) प्राश्य(चाटेर) शेषमसञ्चरे निदध्यात् । तत आचम्य- 'ॐ वाङ्म इत्यादीनां सप्तानां परमेष्ठी ऋषिः कुमारी देवी गायत्री छन्दः परमात्मा देवता प्राणोपस्पर्शने विनियोगः।' 'ॐ वाङ्मऽआस्येऽस्तु' (इति दक्षकराग्रेण मुखम्), 'ॐ नसोर्मे प्राणोऽस्तु'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

(इति तर्जन्यङ्गुष्ठाभ्यां युगपन्नासिकारन्ध्रद्वयम्), 'ॐ अक्ष्णोर्मे चक्षुरस्तु' (इति अनामिकाऽङ्गुष्ठाभ्यां युगपच्चक्षुर्द्वयम्), (इति मन्त्राऽऽवृत्त्या मध्यमाऽङ्गुष्ठाभ्यां क्रमशः दक्षिणवामौ कर्णौ), 'ॐ बाह्वोर्मे बलमस्तु' (इति करद्वयाऽग्राभ्यां परस्परं बाहू), 'ॐऊर्वोर्मे ओजोऽस्तु'(इति करतलाभ्यां युगपदूरुद्वयम्), 'ॐअरि-ष्टानि मेऽङ्गानि तनूस्त्वा मे सह सन्तु' (इति शिरःप्रभृतिपादान्तानि अङ्गानि व्यस्ताभ्यां हस्ताभ्याम् आलभेत (स्पृशेत्) ।। ततस्त्रिराचामेत् ।। ततः 'गौर्गौर्गौः' इति कन्यापक्षीयैरुक्ते गोप्रतिनिधित्वेन कुशं गृहीत्वा कन्याप्रदः 'ॐगौर्गृह्यताम्' इति वदेत् । 'ॐगृहणामि' इत्युक्त्वा तत्कुशं गृहीत्वा वरः- 'ॐ माता रुद्राणामिति वसिष्ठ ऋषिः गौर्देवता त्रिष्टुप् छन्दः गोरभिमन्त्रणे विनियोगः ।' "ॐ माता रुद्राणां दुहिता वसूनां स्वसा-ऽऽदित्यानाममृतस्य नाभिः। प्रनुवोचं चिकितुषे जनाय मा नागामदितिं वधिष्ट, मम चाऽमुष्य (अमुकशर्म्मणः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कन्याप्रदस्य) च पाप्मा हत उत्सृजत तृणान्यत्तु ।।" इत्युच्चार्य तत् कुशं नखाऽग्रेण छिन्द्यात् ।। इति ।।

ततो वरपक्षीयः पुरोहितः केशतुषशर्करादि-रहितां गोमयोपलिप्तां होमवेदीं कुशैः परिसमुह्य, तान् ऐशान्यां परित्यज्य, गोमयोदकेन त्रिः(३) उपलिप्य, स्फ्येन (दाबिलो) स्रुवमूलेन वा प्रागग्रतया प्रादेशमितं प्रदेशम् उत्तरोत्तरक्रमेण त्रिः (३) उल्लिख्य, उल्लेखनक्रमेण दक्षिणहस्ताऽनामिकाऽङ्गुष्ठाभ्यां यथोल्लिखिताभ्यो रेखाभ्यः त्रिः (३) पांसूनुद्धृत्य, कर्मपात्रस्थजलेन अभ्युक्ष्य (सेचेर) तूष्णीं कांस्यपात्रस्थमग्निं योजकनामानं प्रत्यङ्मुखं मध्यतः समाधाय, तं प्रज्ज्वाल्य, तद्रक्षार्थं कञ्चन ब्राह्मणं नियुञ्जीत ।। अत्र चाऽष्टौ ब्राह्मणान् वृत्वा ऽग्निस्थापनपद्धतिरीत्या कुशकण्डिकादिकं कृत्वा पञ्चवारुण्यादि- पर्यन्तो होमः कार्यः।। तत्पश्चात् -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततः सुलग्नसमागमप्राक्काले कन्यापक्षीयवस्त्रभूषणादिभिर्भूषितां कन्यां कन्याप्रदः गन्धपुष्पादिभिः पूजयेत् । तत्र मन्त्राः-

'ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽ इषाण । सर्वलोकम्मऽ इषाण' ।।१।। 'ॐ अम्बेऽ अम्बिकेऽ अम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्' ।।२।। 'ॐ समक्ख्ये देव्या धिया सन्दक्षिणयोरु चक्षसा । मामऽ आयुः प्प्रमोषीर्म्मोऽ अहन्त वव्वीरं व्विदेय तव देवि सन्दृशि'।।३।। इति मन्त्रैः पूजयित्वा यानि यानि देयानि वस्तूनि सन्ति तानि कन्यायै दद्यात् । ततो वरश्च वध्वै प्रथाशक्यानि हरित (हरियो) पीत (पहेँलो) श्वेत (सेतो) रक्त (रातो) नील (नीलो) माञ्जिष्ठ (गुलाबी) कौसुम्भ (कुसुम) काश्मीर (बैजनी) यक्षकर्दम (आसमानी) मृगमद (कस्तुरिया) आदि नानारङ्गरञ्जितानि (किसिम-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किसिमका रङ्गले रङाइएका) विचित्र कार्पास-कौशेय-पट्टवस्त्र -नूतनस्वर्णसूत्राञ्चनानि (चित्रविचित्रका सूती-रेशमी-दुपट्टा-चाँदीका मसिना तारले बुट्टा भरिएका तास तथा सुनका तारले बुट्टा बनाइएका कुच्चीन अनि) नानादिग्देशजातानि (देशदेशावरबाट ल्याइएका) बहुक्रयक्रीतानि (धेधेरै मोल परेका) बहुमौल्यानि (महँगा-महँगा) नानानामधेयानि (अनेक नाउँ गरेका) दुकूलोत्तरीय-कञ्चुकादीनि (दोसल्ला मजेत्रो पछ्यौरा चोलो आदिमध्ये आफूले दिइने वस्तुहरूलाई) रौप्य-कांस्यादिपात्रोपरि संस्थाप्य (चाँदी वा काँसको फराकिलो थालमा राखेर तलको मन्त्र पढ्दै वधूलाई दिनू ।) मन्त्रः- "ॐ यदश्वाय व्वासऽ उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै सन्दानमर्व्वन्तं पड्वीशं प्रिया देवेष्वायामयन्ति ।। जरां गच्छेति प्रजापतिर्ऋषिर्व्वासो देवता, त्रिष्टुप्छन्दः वस्त्रपरिधाने विनियोगः । ॐ जरां गच्छ परिधत्स्व व्वासो भवाकृष्टो नामभिशस्तिपावा । शतं च जीव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शरदः सुवर्चारयिं च पुत्राननुसंव्ययस्वाऽऽयुष्मतीदं परिधत्स्व व्वासः।। ॐ या अकृन्तन्नवयन् या अतन्वत । याश्च देवीस्तनूनभितो ततन्थ तास्त्वा देवीजरसे संव्ययस्वाऽऽयुष्मतीदं परिधत्स्व व्वासः।।'' इति पठित्वा तत्सर्वं वध्वै दद्यात् ।। ततो मङ्गलसूत्रम् (पोते), ललन्तिकाम् (तिलहरी) इमे द्वे विहाय अन्यानि सौभाग्याऽऽभरणतया प्रसिद्धानि यथाशक्यानि परिधेयभूषणानि तथा मणि (मणि) मौक्तिक (मुक्ता) हीरक (हीरा) गारुत्मत (पन्ना) मरकत (मरकतमणि) पुष्पराग (पुखराज) नील (नीलम) महानील (मूगा) इन्द्रवैदूर्य्य (इन्द्रमणि) गोमेदादि (गोमेद मणि आदि) महार्घविविधोपलशोभितस्वर्णरचित- कटक (कडा) केयूर (बाहीं) पादाङ्गुलीयक (बिछिया) काञ्ची (करधनी) हार (सिक्री) ग्रैवेयक (हँसुली) नासिकाऽऽभरण (नत्थ-फुली-बुलाकी) तिलक (टीका) ताटङ्क (ढुङ्गी) स्वर्णपुष्प (टप) कङ्कण (चुरा) कराङ्गुलीयक (औँठी)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बाहुबन्ध (बाजु) किरीट (बिन्दी) शिरःपुष्पादीनि (फुल आदि गरिएका) विविधस्वर्णशृङ्खला- पट्टसूत्रग्रथितानि (सुनका नाना प्रकारका सिक्रीहरू, जालीहरू आदि) नानानामधेयादि (अनेक किसिमका नाउँ भएका) भूषणानि (गरगहनाहरूलाई) रौप्यकांस्यादिपात्रोपरि संस्थाप्य (चाँदी वा काँसाको थालमा राखेर) निम्नमन्त्रं पठन् दद्यात् । तत्र मन्त्रः- "ॐ रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा विभजतु ऋतस्य पथा प्रेत चन्द्रदक्षिण वि स्वः पश्य व्यन्तरिक्षं यतस्व सदस्यै ।।१।। ॐ स्वर्णधर्म्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्योतिः स्वाहा स्वर्णसूर्यः स्वाहा" ।।२।। इति दद्यात् ।।

ततः कन्याप्रदश्च वराय अन्तरीयं (धोतीप्रभृतिनामकम्) दद्यात् । तत् सर्वं गृहणन् वरः पठेत् - "ॐ परिधास्यै इति आथर्वण ऋषिर्लिङ्गोक्ता देवताः पङ्क्तिश्छन्दः अन्तरीयपरिधाने विनियोगः। ॐ परिधास्यै यशोधास्यै

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दीर्घायुस्त्वाय जरदष्टिरश्मि । शतं च जीवामि शरदः पुरूचीरास्पोषमभिसं-व्ययिष्ये'' ।। इति पठेत् ।। पुनः कन्याप्रदः राङ्कवादिकम् (दोसल्लाख्योर्णा-वस्त्रप्रभृति) उत्तरीयं दद्यात् । तद् गृह्णन् वरः पठेत् - ''ॐ यशसा मेत्याथर्वण ऋषिर्लिङ्गोक्ता देवता: त्रिष्टुप्छन्दः उत्तरीयपरिधाने विनियोगः। ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती । यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम्'' ।। इति पठेत् ।। ततः कन्याप्रदः वराय अन्यानि यथाशक्ति- सज्जीकृतानि परिधानीयानि वस्त्राणि भूषणानि च तूष्णीं दद्यात्। वरश्च यथोचितं परिदध्यात् ।। ततः कन्या वरश्च द्विराचामेत् ।। ततः कन्याप्रदः 'परस्परं समञ्जेथाम्' इति प्रैष (आदेश) मुच्चार्य कन्या-वरौ संमुखौ कुर्यात् । वरः कन्यां पश्यन् -''ॐ समञ्जन्तु इत्याथर्वण ऋषिर्लिङ्गोक्ता देवता अनुष्टुप्छन्दः समञ्जने विनियोगः। ॐ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ । सम्मातरिश्वा सन्धाता वमुदेष्ट्री दधातु नौ'' ।। इति।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

ततः सपत्नीकः कन्याप्रदः वधूवरयोश्चरणप्रक्षालनम् (गोडा धुने कार्य) कुर्य्यात् -। [illegible]त्पात्रोपरि (खड्कुलो) वरस्य चरणौ वध्वाश्च चरणौ संस्थाप्य करुवा (झारी) स्थशुद्धजलेन ब्राह्मण -वरस्य पूर्वं दक्षिणं पादं प्रक्षालयति । यथा- "विराजो दोहोसीति प्रजापतिर्ऋषिर्यजुश्छन्द आपो देवता दक्षिण-पादप्रक्षालने विनियोगः। ॐ विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः"।। इति मन्त्रेण प्रथमं दक्षिणं पादं प्रक्षाल्य अनेनैव मन्त्रेण वामपादं च प्रक्षालयेत् ।। कन्यायास्तु अनेनैव मन्त्रेण प्रथमं वामं पश्चात् दक्षिणं पादं प्रक्षालयेत् ।। क्षत्रियादीनां वराणां तु अनेनैव मन्त्रेण प्रथमं वामं पादम् पश्चात् दक्षिणपादं प्रक्षालयेत् ।। ततः चन्दनाऽक्षतमाल्या-दिना कन्यां वरं च सम्पूज्य स्वर्णशृङ्खलादिकं परिधाप्य धूपदीपौ च कारयेत् ।। अत्रैवाऽवसरे इतरेऽपि कन्यापक्षीयाः कन्यायाश्चरणौ प्रक्षालयन्ति (गोडा धोइदिन्छन् ।) यथाशक्ति यौतिकम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

(उपहारं) च ददति ।।

अथ पाणिग्रहणाऽर्हे लग्ने समागते उभयपक्षयोः लग्नगोदानविधानम् । प्रथमं वरपिता- सजलपात्रस्थं गोनिष्क्रयीभूतं स्वर्णद्रव्यम् चन्दनाक्षत - पुष्पैः - 'ॐ नमो गोभ्यः०' इत्यादिना सम्पूज्य तथा देयब्राह्मणं च - 'ॐ नमो ब्रह्मण्यदेवाय०' इत्यादिना सम्पूज्य कुशादीन्यादाय पात्रं स्पृशन् पूर्वसंकल्प-मुच्चार्य अद्येहाऽमुकगोत्रोऽहम् अमुकराशेरस्य वरस्य विवाहलग्नाद् यत्रकुत्रस्थानस्थितानाम् ग्रहाणां दुष्टफलनिरासपूर्वकं शुभफलप्राप्तये आदित्यादिनवग्रहाणां प्रीतये इदं सुवर्णं तन्निष्क्रयीभूतं द्रव्यं वा अमुक गोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यम् सम्प्रददे ॐ तत्सत् ।। ब्राह्मणश्च 'ॐ स्वस्ति' इति उच्चरन् तत्पात्रमाकर्ष्य तत्रस्थजलेन- 'ॐ कोऽदात्०' इत्यादि मन्त्रं पठन् यजमानम् अभिषेकं कृत्वा तद् द्रव्यम् गृह्णीयात् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ कन्यापिताऽपि लग्नगोदानं कुर्यात् । पूर्वोक्तरीत्या सजलपात्रस्थं गोनिष्क्रयीभूतं द्रव्यं चन्दनाऽक्षतपुष्पैः - 'ॐ नमो गोभ्यः०' इत्यादिना सम्पूज्य तथा देयब्राह्मणं च- 'ॐ नमो ब्रह्मण्यदेवाय०' इत्यादिना संपूज्य कुशादीन्यादाय पात्रं स्पृशन् पूर्वसंकल्पमुच्चार्य 'अद्येहेत्यादि अमुकगोत्रोऽहम् अमुकराशेरस्याः कन्यायाः कन्यादानलग्नात् निषिद्धे चतुर्थाऽष्टम - द्वादशस्थाने स्थितानां क्रूरग्रहाणां दुष्टफलनिवृत्तिपूर्वकम्, शुभे स्थाने स्थितानां ग्रहाणां शुभफलाधिकताऽवाप्तये इदं गोनिष्क्रयीभूतं द्रव्यं चन्द्रदैवतम् अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे' ।। इति दत्त्वा - 'ॐ कपिले सर्वदेवानाम्०' इत्यादिना प्रार्थ्य दानप्रतिष्ठाद्रव्यं सकुशोदक-मादाय- 'ॐ अद्य कृतैतद् ग्रहप्रातिकूल्यसंभाविताऽ-शुभफलनिवृत्तिपूर्वक-शुभफलाऽ वाप्तये कृतस्य गोनिष्क्रयी-भूतद्रव्यदानकर्मणः साङ्गता-सिद्धये इदं रजतं द्रव्यं चन्द्रदैवतं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गोदानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे' ।। इति दद्यात् ।। ततः पुनः कुशादीन्यादाय पूर्वसंकल्पमुच्चार्य अमुकगोत्रः 'अमुकशर्माऽहं समस्त पितॄणां निरतिशयानन्द-ब्रह्मलोकाऽवाप्त्यादि कन्यादानकल्पोक्त-निखिलफलाऽवाप्तये, तथा अनेन वरेण अस्यां कन्यायाम् उत्पादयिष्यमाणया सन्तत्या द्वादशपरान् द्वादशाऽवरान् आत्मना सपञ्चविंशान् पुरुषान् पवित्री - कर्तुं श्रीमल्लक्ष्मीनारायणप्रीतिसिद्धये ब्राह्मेण विधिना यथाशक्ति अलंकृतायाः कयायाः प्रदानं करिष्ये' इति संकल्पजलम् उत्सृ-जेत् ।। ततः कृताञ्जलिः- 'ॐ दाताऽहं वरुणो राजा द्रव्यमादित्यदैवतम् । वरोऽसौ विष्णुरूपेण प्रतिगृह्णत्वयं विधिः।।' इति च पठेत् ।।

ततः उत्थाय शंख-घण्टा-तूर्यमङ्गलघोषपुरस्सरम् भारते उदङ् (उत्तर) मुखोपविष्टः कन्यापिता प्रत्यङ् (पश्चिम) मुखोपविष्टायाः कन्यायाः दक्षिणं CC-0. Nepal Sanskrit Academy, Kathmandu Collection पाणिं प्राङ् (पूर्व) मुखोपविष्टस्य वरस्य दक्षिणपाणितलस्योपरि निधाय;

नेपाले उभावपि वधूवरौ मञ्चे मञ्चे वा एकस्यामेव खट्वायां कन्यां, कन्याया वामे वरं च पूर्वमुखौ उपवेश्य (बसाएर) प्रत्यङ् (पश्चिम) मुखः कन्यापिता शङ्खदूर्वाक्षतकुशजलादीनि कन्यादक्षिणपाण्यङ्गुष्ठं च गृहीत्वा अधस्तात् विस्तृतपात्रं (खड्कुलो) निधाय पत्न्या भृङ्गारेण (झारी वा करुवा नामकपात्रेण) सततां जलधारां प्रवर्तयन्त्याम् -

(कन्यादानमहासंकल्पः)

"ॐ तत्सत् ॐ तत्सत् ॐ तत्सत् विष्णुः विष्णुः विष्णुः श्रीमुकुन्दसच्चिदानन्दस्य ब्रह्मणो ऽनिर्वाच्यमायाशक्तिविजृम्भिताविद्यायोगात् कालकर्म्मस्वभावा - विर्भूतमहत्तत्त्वोदिताऽहङ्कारोद्भूत-वियदादिपञ्चमहाभूतेन्द्रियदेवता-निर्मितिऽण्डकटाहे चतुर्दशलोकात्मके लीलया तन्मध्यवर्ति - भगवतः श्रीनारायणस्य नाभिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य समस्तजगदुत्पत्ति-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थिति-लयकारणस्य जगद्रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्य अच्युतानन्तवीर्यस्य श्रीमद्‌भगवतो महापुरुषस्य अचिन्त्यापरिमितशक्त्या ध्येयमानस्य महा-जलौघमध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमेऽव्यक्तमहदहङ्कार- पृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते अस्मिन् महति ब्रह्माण्डखण्डे आधारशक्ति श्रीमदादिवाराहदंष्ट्राग्रविराजिते कूर्माऽनन्तवासुकितक्षक - कुलिक-कर्कोटक-पद्म-महापद्मशंखाद्यष्ट-महानागैर्ध्रियमाणे ऐरावत-पुण्डरीक-वामन-कुमुदाऽञ्जन-पुष्पदन्त-सार्वभौम- सुप्रतीकाष्टदिगज-प्रतिष्ठितानाम् अतल-वितल-सुतल-तलातल-रसातल-महातल-पाताल-लोकानामुपरिभागे भूर्लोक-भुवर्लोक-स्वर्लोक-महर्लोक-जनलोक-तपोलोक-सत्यलोकाऽऽख्य सप्तलोका-नामधोभागे चक्रवाल-शैल-महावलयनागमध्यवर्तिनो महाकाल-महाफणिराजशेषस्य सहस्रफणानां मणिमण्डलमण्डिते दिग्दन्तिशुण्डोत्तम्भिते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अमरावती-अशोकवती-भोगवती-सिद्धवती-गान्धर्ववती -काञ्ची -अवन्ती-अलकावती- यशोवतीति पुण्यपुरी-प्रतिष्ठिते इन्द्राग्नियमनिर्ऋतिवरुणवायु-कुबेरेशानाष्टदिक्पालप्रतिष्ठिते वर-ध्रुवाऽ-धर-सोमपा-प्रभञ्जनाऽ-नल-प्रत्यूष-प्रभासाख्याष्टवसुभिर्विराजिते हर-त्र्यम्बक-रुद्र-मृगव्याधापराजितकपाली-भैरव-शम्भुकपर्दि-वृषाकपि-बटुरूपाऽऽख्यैकादशरुद्रैः संशोभिते रुद्रोपेन्द्रसवितृधातृत्वष्ट्रयमेन्द्रे-शानभगमित्रपूषार्काख्यद्वादशादित्यप्रकाशिते यमनियमासनप्राणायाम-प्रत्याहारधारणाध्यानसमाध्यष्टाङ्गनिरतवशिष्ठ-बालखिल्य-विश्वामित्र-दक्ष-कात्यायन-कौडिन्य-गौतमाऽ-ङ्गिरस-पाराशर्य-व्यास-वाल्मीकि-शुक-शौनक-भरद्वाज-सनक-सनन्दन-सनातन- सनत्कुमार-नारदादिमुख्यमुनिभिः पवित्रिते लोकाऽलोकाचलवलयिते लवणेक्षुरससुरासर्पिर्दधिक्षीरोदकयुक्त-सप्तार्णवपरिवृते जम्बू-प्लक्ष-शाल्मलि-कुश-क्रौञ्च-शाक-पुष्कराख्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तद्वीपयुते इन्द्रकांस्यताम्रगभस्तिनाग-सौम्यगन्धर्वचारणभारतेति नवखण्डमण्डिते सुवर्णगिरिकर्णिकोपेत-महासरोरुहाकारपञ्चाशत् कोटियोजनविस्तीर्ण-भूमण्डले अयोध्या-मथुरा- माया-काशी-काञ्ची -अवन्तिका -द्वारावतीति सप्तपुरीप्रतिष्ठिते महामुक्तिप्रदस्थले शालग्राम-शम्भल- नन्दिग्रामेति ग्रामत्रयविराजिते चम्पकारण्य- बदरिकारण्य-दण्डकारण्याऽ-र्बुदारण्य-धर्मारण्य-पद्मारण्य-गुह्यारण्य-जम्बुकारण्य-विन्ध्यारण्य- द्राक्षारण्य-नहुषारण्य-काम्यकारण्य-द्वैतारण्य-नैमिषारण्यादीनां मध्ये सुमेरु-निषध-कूट-शुभ्रकूट-श्रीकूट-हेमकूट -रजतकूट-चित्रकूट-त्रिकूट-किष्किन्ध-श्वेताद्रिकूट-हिमवद्-विन्ध्याचलानां हरिवर्ष-किम्पुरुषवर्षयोश्च दक्षिणे नवसहस्त्रयोजनविस्तीर्णे भरतखण्डे मलयाचल-सह्याचल-विन्ध्याचला-नामुत्तरेण स्वर्णप्रस्थ-चण्डप्रस्थ -सूक्तिक-आवन्तर्क -रमणक-महारमणक-पाञ्चजन्य-सिंहल-लङ्का-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऽशोकवती-अलकावती-सिद्धावती - गान्धर्ववत्यादि-पुण्यपुरीविराजिते नवखण्डोपद्वीपमण्डिते दक्षिणाऽवस्थितरेणुकाद्वय-सूकर-काञ्ची-कालिकाल-बटेश्वर-कालञ्जर-महाकालेति नवखण्डयुते-द्वादशज्योतिर्लिङ्ग-गङ्गा (भागीरथी)- गोदा (गौतमी) -क्षिप्रा-यमुना-सरस्वती-नर्मदा-तापी पयोष्णी-चन्द्रभागा- कावेरी-मन्दाकिनी-प्रवरा-कृष्णा-वेण्या-भीमरथी-तुङ्गभद्रा-मलापहा-कृतमाला-ताम्रपर्णी-विशालाक्षी-वञ्जुला-चर्म्मण्वती-वेत्रवती-भोगवती-विशोका-कौशिकी-गण्डकी-वासिष्ठी-प्रमदा-विश्वामित्री-फल्गुनी-चित्रकाश्यपी-सरयू-सर्वपापहारिणी-करतोया-प्रणीता-वज्रा-वक्रगामिनी-सुवर्णरेखा-शोणा-भवनाशिनी-शीघ्रगा-कुशवर्तिनी-ब्रह्मानन्दा-महितनया-वागमती-कमला-त्रिशूली, नारायणी-कर्णाली-शारदा इत्याद्यनेकपुण्यनदीभिर्विलासिते-ब्रह्मपुत्र-सिन्धुनदादिपरमपवित्रजलविराजिते हिमवत्-मेरु गोवर्धन-क्रौञ्च-चित्रकूट

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

-महेन्द्र-मलय-सह्य-इन्द्रकील-पारियात्राद्यनेक पर्वतसमन्विते मतङ्ग-माल्य-किष्किन्ध-ऋष्यशृङ्गेति महानगसमन्विते अङ्ग-बङ्ग-कलिङ्ग-काश्मीर-कम्बोज-सौवीर-सौराष्ट्र-मगध-नेपाल-केरल-चोल-पाञ्चाल-गौड-मालव-मलय-सिंहल-द्रविड-कर्नाटक-ललाट-करहाट-वरहाट-पानाट-पाण्ड्य-निषध-मागध-आन्ध्र-दशार्ण-भोज-कुरु-गान्धार-विदर्भ-विदेह-बाह्लीक-बर्बर-कैकेय-कोसल-विराट-शूरसेन-कोङ्कण-कैकट-मत्स्य-मद्र-पारसीक-खर्जूर-यावन-म्लेच्छ-जालन्धरेति तथा सिद्धवत्यनेकदेशविशेष-भाषा-भूमिपाल-विचित्रिते इला-वृत-कुरु-भद्राऽश्व-केतुमाल-किम्पुरुष-रमणक-हिरणमयादिनववर्षाणाम् मध्ये भरतखण्डे बकुल-चम्पक-पाटलाब्ज-पुन्नाग- जाति-करबीर-रसाल-कह्लार-केतक्यादि नाना विधकुसुमस्त-वकविराजिते कोकन्त-हिरण्यशृङ्ग-कुब्जार्बुद-मणिकर्णी-वट-शालग्राम-सूकर-मथुरा-गया-निष्क्रमण-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोहार्गल-पोतस्वामि-प्रभास-बदरी इति चतुर्दशगुह्यविलसिते जम्बूद्वीपे कुरुक्षेत्रादिसमभूमध्यरेखायाः पूर्वदिग्भागे कुलमेरोर्दक्षिणदिग्भागे विन्ध्यस्य उत्तरे देशे श्रीशैलस्य वायव्यदेशे विन्ध्याचल-हिमालययोर्मध्यदेशे आर्यावर्ताख्यपुण्यक्षेत्रे मत्स्य-कूर्म-वराह-नृसिंह-वामन-परशुराम-राम-कृष्ण-बुद्ध-कल्कि इति दशावताराणां मध्ये बौद्धावतारे गङ्गादि सरिद्भिः पाविते एवं नवसहस्रयोजनविस्तीर्णे भारतवर्षे निखिलजनपावन-परमभागवतोत्तमशौनकादिनिवासिते नैमिषारण्ये आर्यावर्तान्तर्गतब्रह्मावर्तैकदेशे सूर्याऽन्वयभूभृत्प्रतिष्ठिते श्रीमन्नारायण नाभिकमलोद्भूतसकलजगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीये परार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीये मुहूर्ते रथन्तरादिद्वात्रिंशत्-कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे स्वायम्भुवादि मन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृत-त्रेता-द्वापर-कलिसंज्ञकानां चतुर्णां युगानाम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मध्ये वर्तमाने अष्टाविंशतितमे कलियुगे तत्प्रथमे विभागे (पादे) श्रीमन्नृ-पतिविक्रमाऽब्दात् श्रीमन्नृपशालिवाहनाद् वा यथासंख्यागमेन चान्द्र-सावन-सौर-नाक्षत्रादिप्रकारेणाऽऽगतानां प्रभवादिषष्टिसंवत्सराणां मध्ये अमुकनाम्नि संवत्सरे उत्तर (वा दक्षिण) गोलाऽवलम्बिनि श्रीमार्तण्डमण्डले अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषेण विशिष्टायाम् अस्यां शुभपुण्याऽवस्थायाम् अमुकगोत्रोऽमुकराशिरमुक शर्मा सपत्नीकोऽहम् अमुकगोत्रस्य अमुकप्रवरस्य अमुकशाखिनोऽ-मुकवेदाध्यायिनोऽमुकशर्मणः प्रपौत्राय, अमुकशर्मणः पौत्राय, अमुकशर्मणः पुत्राय आयुष्मते विष्णुस्वरूपिणे कन्यार्थिने अमुकनाम्ने वराय: अमुकगोत्रस्य अमुकप्रवरस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अमुकशाश्विनोऽमुकवेदाध्यायिनोऽ मुकशर्म्मणः प्रपौत्रीम्, अमुकशर्म्मणः पौत्रीम्, अमुकशर्म्मणः पुत्रीम् आयुष्मतीं श्रीस्वरूपिणीं वरार्थिनीम् अमुकनाम्नीम् इमां कन्यां यथाशक्त्यलंकृतां यथाशक्त्युपकल्पितयौतुकयुतां प्रजापतिदैवत्यां पुराणो- क्तशतगुणीकृतज्योतिष्टोमातिरात्रसमस्त-फलप्राप्तिकामः मम समस्तपितॄणां निरतिशयानन्द-ब्रह्मलोकावाप्त्यादि-कन्यादानकल्पोक्तफलाऽवाप्तये अनेन वरेणाऽस्यां कन्यायाम् उत्पादयिष्यमाणसन्तत्या द्वादशपरान् द्वादशाऽवरान् पितॄन् आत्मानञ्च पवित्रीकर्तुं श्रीलक्ष्मीनारायणप्रीतये देवाग्नि-गुरुब्राह्मणसान्निधौ अग्निसाक्षिकतया सहधर्माचरणाय तुभ्यमहं संप्रददे प्रतिगृहणातु भवान् प्रजापतिः प्रीयताम्' इति संकल्प्य दाता उत्थाय सकुशाऽक्षतजलं कन्याहस्तं वरहस्ते समर्प्य अञ्जलिं बध्वा कन्यादानवाक्यं पठेत् - 'कन्यां कनकसम्पन्नां कनकाऽऽभरणैर्युताम् । दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ।।१।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

विश्वम्भराः सर्व्वहिताः साक्षिण्यः सर्व्वदेवताः । इमां कन्यां प्रदास्यामि पितॄणां तारणाय च ।।२।। गौरीं कन्यामिमां विप्र ! यथाशक्तिविभूषिताम् । गोत्राय शर्मणे तुभ्यं दत्तां विप्र ! समाश्रय ।।३।। कन्या लक्ष्मीः समाख्याता वरो नारायणः स्मृतः। तस्मात् कन्याप्रदानेन कृष्णो मे प्रीयतामिति' ।।४।। इति कन्यादानवाक्यानि पठित्वा ततः कन्यां प्रार्थयेत् -'कन्ये ममाऽग्रतो भूयाः कन्ये मे देवि पार्श्वयोः ! कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम् '।। इति संप्रार्थ्य श्रीलक्ष्मीनारायणप्रीतये वरकन्ययोः पूजनं कृत्वा विष्णुं प्रार्थयेत् - 'त्रैलोक्यनाथ देवेश सर्वभूतदयानिधे । दानेनाऽनेन सुप्रीतः सदा शान्तिं प्रयच्छ मे ।। इति।। तदनन्तरं वरः पठेत् - 'ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्ब्बाहुभ्यां पूष्णो हस्ताभ्यां प्रजापतये प्रतिगृह्णामि द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ॐ स्वस्ति प्रजापतये' इत्युक्त्वा वध्वाः दक्षांगुष्ठं गृहीत्वा इमां कामस्तुतिं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पठेत् - 'ॐ कोऽदात् कस्माऽ अदात् कामोऽदात् कामायादात् कामो दाता कामः प्रतिग्रहीता कामैतत्ते' ।। ततो दाता पुनः अञ्जलिं बध्वा पठेत् - 'कन्या मम कुले जाता पालिताऽ द्यतनाऽवधि । तुभ्यं विप्र मया दत्ता पुत्रपौत्रविवर्धिनी ।। धर्मे चाऽर्थे च कामे च नाति-चरितव्या त्वया इयम्' ।। ततो वरः- 'ॐ नातिचरामि' इति प्रतिवदेत् ।।

ततो दाता उपविश्य कन्यादानप्रतिष्ठां कुर्यात्- । तिलकुशयवजल-सुवर्णादि द्रव्यमादाय- 'ॐ पूर्वसंकल्पसिद्धिरस्तु अद्येह अमुकोऽहं कन्या-दानकर्मणः साद्गुण्यार्थं फलप्रतिष्ठासिद्ध्यर्थम् इदं सुवर्णम् अग्निदैवतम् अमुकगोत्राय वराय तुभ्यं सम्प्रददे तथा दास्यमानं यौतुकादिकम् (उपहारादिकम्) च वराय तुभ्यं संप्रददे' इति संकल्प्य स्वहस्तस्थं सर्वं दद्यात् ।। वरश्च -'ॐ स्वस्ति रुद्राय दक्षिणां प्रतिगृह्णामि' इति प्रतिवदन् गृह्णीयात् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ लग्नग्रन्थि (लगनगाँठो) करणम् ।। ततः कन्याप्रदपक्षीयः कोऽपि ब्राह्मणः उभयपक्षीयं यथोचितं श्वेतवस्त्रयुगलं प्रसार्य तत्प्रान्ते पूगीफलयुगलं यज्ञोपवीतयुगलं सर्षपान् कुङ्कुमाक्तान् अक्षतान् द्रव्यम् तत्समं वरपक्षीयद्रव्यम् हरिद्राखण्डद्वयं दूर्वाङ् कुराँश्च निधाय यज्ञोपवीतेन तत्प्रान्तं दृढं बध्वा कलशोपरि संस्थाप्य चन्दनाक्षतपुष्पैः प्रतिष्ठां कुर्यात् । यथा - 'ॐ एतन्ते देव सवितुर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमेव तेन यज्ञपतिं तेन मामव ।। ॐ भूर्भुवः स्वः अञ्चलग्रन्थे सुप्रतिष्ठो भव' इति मन्त्रेण प्रतिष्ठाप्य प्रविष्ठान्ते एव वरः वध्वाः अङ्गुष्ठम् त्यजेत् ।।

अथ कन्यापिता कन्यादानभूयसीदक्षिणासंकल्पं कुर्यात् -।। भूयसीं दक्षिणाम् उपनीय 'देयद्रव्याय नमः' इति गन्धाक्षतपुष्पैः संपूज्य सकुशतिल-यवजलां तां दक्षिणां हस्तेनाऽऽदाय- 'ॐ पूर्वसंकल्पसिद्धिरस्तु, अद्येहेत्यादि अमुकगोत्रोऽमुकराशिरमुकशर्मा सपत्नीकोऽहं कृतस्य कन्यादानकर्मणः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साङ्गतासिद्धिद्वारा श्रीलक्ष्मीनारायणप्रीतिपुरःसरं श्रुतिस्मृतिपुराणोक्तसकल-फलावाप्तये कन्यादानकर्मणः साद्गुण्यार्थम् इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यो नटनर्त्तकगायकेभ्यः स्वमनसा कल्पितेभ्योऽन्येभ्यो दक्षिणीयेभ्यश्च यथाभागं विभज्य यथाकालेन दातुम् उत्सृजे ॐ तत्सत् न मम' इति उत्स्टज्य यथाऽर्हं दद्यात् ।। ततः पुरोहितो गन्धपुष्पादीनि आदाय- 'ब्राह्मणमद्य व्विदेयं पितृमन्तं पैतृमत्यमृषिभार्षेय ७सुधातु दक्षिणम । अस्मदट्टा ना देवत्रा गच्छत प्रदातारमाविशत ।।१।। ॐ अग्नये त्वा मह्यं व्वरुणो ददातु सोऽमृतत्वमशीयायुर्दात्रऽएधि मयो मह्यं प्रतिग्रहीत्रे, रूद्राय त्वा मह्यं व्वरुणो ददातु सोऽमृतत्वमशीयप्राणो दात्रऽएधि व्वयो मह्यं प्रतिग्रहीत्रे, बृहस्पतये त्वा मह्यं व्वरुणो ददातु सोऽमृतत्वमशीय त्वग्दात्त्रऽएधि मयो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मह्यंप्रतिग्रहीत्रे, यमाय त्वा मह्यं व्वरुणो ददातु सोऽमृतत्वमशीय प्राणो दात्रऽएधि व्वयो मह्यं प्रतिग्रहीत्वे, बृहस्पतये त्वा मह्यं व्वरुणो ददातु सोऽमृतत्वमशीय त्वग्दात्रऽएधि मयो मह्यं प्रतिग्रहीत्रे, यमाय त्वा मह्यं व्वरुणो ददातु सोऽमृतत्वमशीय हयोदात्रऽ एधि व्वयो मह्यं प्रतिग्रहीत्रे ।।२।। ॐ कोऽदात् कस्माऽ अदात् कामोऽदात् कामायाऽदात्, कामो दाता कामः प्रतिग्रहीता कामै-तत्ते' ।।३।। इति पठन् सपत्नीकं कन्यापितरं तिलकपुष्पाभ्यामलङ्-कुर्यात् ।। तत्पश्चात् कौतुकाऽऽगारे वधूमानीय गायन्त्यो वृद्धाः वा पुरन्ध्र्यो वा कन्यासख्यः वरदत्तानि वासांसि भूषणानि च कन्यां परिधापयन्ति, सम्यक् शृङ्गारादिना भूषयन्ति तथा लग्नग्रन्थिं च ग्रन्थिभागं कन्याकट्यां बध्नन्ति अपरभागं वरग्रहणार्थे लम्बमेव मुञ्चन्ति । इमम् लग्नग्रन्थिम् चतुर्थीकर्मदिवसे मोचयन्ति ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ वरपिता कन्यापित्रा संकल्प्य दत्तां प्रत्तां (खलोखुलो) गृहीत्वा स्वस्थानं गच्छति । वरस्तु कौतुकाऽऽगारे गत्वा वस्त्रभूषणादिभिरलंकृतायाः, सखिभिरालिङ्गितायाः वध्वाः लग्नग्रन्थिलम्बप्रान्तं दक्षिणहस्तेन समादाय मण्डपाग्निसमीपं गमनाय निम्नमन्त्रं पठन् - 'यदैषीत्याथर्वण ऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवता निष्क्रमणे विनियोगः। ॐ यदैषि मनसा दूरं दिशोऽनु पवमानो वा हिरण्यपर्णो व्वैकर्णः स त्वा मन्मनसां करोतु असौ'।। अमुक (स्वमनोरथाऽनुसारेण वध्वाः नूतनं नाम मनसा कृत्वा) लक्ष्मीः इति सम्बुद्ध्यन्तं नाम गृह्णन् , स्वदक्षिणहस्तेन वध्वाः लग्नग्रन्थिप्रान्तं गृहीत्वा कौतुकाऽ-गारतोऽग्निसमीपं गन्तुं बहिर्निष्क्रामति तत्र प्रविशति च ।।

।। इति कन्यादानविधिः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ विवाहविधिः

ततः सवधूको वरो वधूं दक्षिणतः कृत्वा वेद्याः दक्षिणे उदङ्मुख उपविशेत् । तत्र पुष्पपल्लववस्त्रभूषितं सजलं कलशं स्कन्धेन दधानः कश्चन दृढो ब्राह्मणादिः (शूद्रभिन्नः) अग्नेः दक्षिणभागे उत्तरभागे वा मौनी तिष्ठेत् ।। अथ कन्याप्रदः 'परस्परं समीक्षेथाम्' इति प्रैषं (आज्ञा) दत्त्वा वधूवरौ परस्परमीक्षयेत् । ईक्षमाणां वधूम् ईक्षमाण एव वरः- 'ॐ अघोरचक्षुरित्यादीनां चतुर्णां प्रजापतिर्ऋषिः आद्यन्तयोस्त्रिष्टुप् मध्यमयोरनुष्टुप् छन्दः कुमारी देवता परस्परैक्षणे विनियोगः।' "ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ।।१।। सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः, तृतीयोऽअग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ।।२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सोमो दददद्गन्धर्वाय, गन्धर्वो दददग्नये, रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ।।३।। सा नः पूषा शिवतमामैरय सा न ऊरू ऽउशती विहर, यस्यामुशन्तः प्रहराम शेपं यस्यामुकामा बहवो निविष्ट्यै'' ।।४।। इति पठेत् ।। ततः वधूसहितो वरः, अग्निं प्रदक्षिणीकृत्य अग्नेः पश्चिमतः शुचिवस्त्राद्याच्छन्ने तृणकटे प्रथमं दक्षिणं चरणं निधाय वधूं दक्षिणतः कृत्वा उपविशेत् । आचम्य वरणसामग्रीं गृहीत्वा कुशादीन्यादाय ब्राह्मणं च वृणुयात् । तत्र वाक्यम् - 'पूर्वसंकल्पमुच्चार्य अमुक गोत्रः अमुक शर्माऽहं धर्मार्थकाम-सिद्धिद्वारा श्रीमत्परमेश्वरप्रीतिजननाय ब्राह्मेण विधिना पित्रा प्रदत्तया अनया कन्यकया सह करिष्यमाणे विवाहहोमकर्मणि कृताऽकृताऽवेक्षणादि ब्रह्मकर्म कर्तुम् अमुकगोत्रं अमुकशर्माणं ब्राह्मणमेभिर्गन्धाऽक्षतपुष्पधौतान्तरी-योत्तरीयाऽऽसन-जलपात्रमुद्रिक-प्रभृतिभिर्ब्रह्मत्वेन त्वां वृणे' इति वृत्वा गन्धादिभिरर्चयेत् । 'वृतोऽस्मि' इति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

ब्राह्मणेनोक्ते 'यथाविहितं कर्म कुरु' इति वरो ब्रूयात्। 'करवाणि' इति च ब्राह्मणः ।

ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् षट् कुशानास्तीर्य तं ब्रह्मत्वेन वृतं ब्रह्माणं पञ्चाशत्कुशमयं ब्रह्माणम् अग्निप्रदक्षिणीकरणक्रमेण आनीय 'अत्र त्वं मे ब्रह्मा भव' इति प्राङ्मुखमुपवेश्य बद्धाञ्जलिः- 'यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः। तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ।।' इति प्रार्थयेत् ।।

ततः प्राग्वृतैर्ब्राह्मणैः कुशकण्डिकामारभ्य पञ्चवारुणीपूर्वकं चतुः-स्वस्त्यादिपर्यन्तेऽग्निस्थापनपद्धतिप्रोक्ते तत्तद्देवतापूजनहवनादिके कर्मणि, पूर्वं तदानीं वा समापिते सति- वरः कुशादीन्यादाय अमुक गोत्रः अमुक शर्मा सवधूकोऽहम् अस्मिन् विवाहकर्मणि ''प्रजापतिम्, इन्द्रम्, अग्निम्, सोमम् ४, अग्निम्, वायुम्, सूर्यम् ३, अग्नीवरुणौ, अग्नीवरुणौ,

CC-0 Nepal Sanskrit Academy, Kathmandu Collection

अग्निम्, वरुणम् - सवितारम् - विष्णुम् - विश्वान्देवान् मरुतः, स्वर्कान्, वरुणम् ५, ऋताषाढम्, ऋतधामानं गन्धर्वम्, ओषधीरप्सरसोमुदः स ६ हितं विश्वसामानं गन्धर्वम्, मरीचीरप्सरसऽआयुवः, सुषुम्ण ६सूर्यरश्मिँचन्द्रमसं, गन्धर्वम्, नक्षत्राण्यप्सरसो भेकुरीः इषिरं विश्वव्यचसं वातं गन्धर्वम्, अपोऽप्सरसऽऊर्ज्जः, भुज्युष्ट सुपर्णं यज्ञं गन्धर्वम्, दक्षिणा अप्सरसस्तावाः, प्रजापतिं विश्वकर्माणं मनोगन्धर्वम्, ऋक्सामान्यप्सरसऽएष्टीः १ २, चित्तम्, चित्तिम्, आकूतम्, आकूतिम्, विज्ञातम्, विज्ञातिम्, मनः, शक्वरीः, दर्शम्, पौर्णमासम्, बृहत्, रथन्तरम्, प्रजापतिम् १ ३, अग्निम् भूतानामधिपतिम्, इन्द्रं ज्येष्ठानामधिपतिम्, यमं पृथिव्या अधिपतिं, वायुमन्तरिक्षस्याऽधिपतिं, सूर्यं दिवोधिपतिं, चन्द्रमसं नक्षत्राणामधिपतिं, बृहस्पतिं ब्रह्मणोऽधिपतिं, मित्रं सत्यानामधिपतिम्, वरुणमपामधिपतिम्, समुद्रं स्रोतसामधिपतिम्, अन्नं साम्राज्यानामधिपतिम्, सोममोषधीनामधिपतिम्,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सवितारं प्रसवानामधिपतिम्, रुद्रं पशूनामधिपतिम्, त्वष्टारं रूपाणामधिपतिम्, विष्णुं पर्वतानामधिपतिम्, मरुतो गणानामधिपतीन्, पितॄन् पतामहान् परानवरान् ततान् ततामहान् १८, अग्निम्, अग्निम्, अग्निम्, वैवस्वतं, मृत्युम् ५, एतान् देवान् स्वयमाचार्यद्वारा वा अर्यमणम्, अग्निम्, अग्निम्, अर्यमणम्, अग्निम्, अग्निम्, अर्यमणम् अग्निम्, अग्निम्, भगम् १०, एतान् देवान् वधूद्वारा; प्रजापतिम्, अग्निम्, स्विष्टकृतम् ५, एतौ देवौ स्वयमाचार्यद्वारा वा ४+३+५+१२+१३+१८+५+१०+२= ७२ यथार्हमाज्यलाजाभ्यां यक्ष्ये'' इत्युत्सृजेत् ।। ततः उपयमनकुशान् वामहस्ते धृत्वा प्रजापतिं मनसा ध्यायन् उत्थाय समिद्धतमेऽग्नौ पूर्वाऽऽसादितास्तिस्रः समिधः प्रक्षिप्य, उपविश्य सपवित्र-दक्षिणचुलुकस्थप्रोक्षण्युदकेन ईशानाद्युदग्पर्यन्तं प्रदक्षिणक्रमेण अग्निं पर्युक्ष्य, प्रणीतापात्रे पवित्रे निधाय, पातितदक्षिणजानुः कुशेन ब्रह्मणाऽन्वारब्धः स्वयमाचार्यो वा स्रुवेण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आज्याहुतीर्जुहुयात्, तत्र तत्तदाहुतिषु स्रुवाऽविशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः कर्तव्यः ।। 'ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापति-र्देवताऽऽज्यहोमे विनियोगः।' 'ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम' इति १ मनसा ।। 'ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवताऽऽज्यहोमे विनियोगः।' 'ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम' ।। एतौ २ आघारौ ।। 'ॐ अग्नये स्वाहा, इदमग्नये न मम' १, 'ॐ सोमाय स्वाहा इदं सोमाय न मम' २, एतावाज्यभागौ ।। 'ॐ महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवता होमे विनियोगः।' 'ॐ भूः स्वाहा, इदमग्नये न मम' १, 'ॐ भुवः स्वाहा, इदं वायवे न मम' २, 'ॐ स्वः स्वाहा, इदं सूर्याय न मम' ३, 'ॐ त्वन्नोऽ अग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः।' 'ॐ त्वन्नोऽ अग्ने व्वरुणस्य व्विद्वान्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवस्य हेडोऽ अवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो व्विश्वा द्वेषा ᳪसि प्रमुमुग्ध्यस्मत् स्वाहा, इदमग्नीवरुणाभ्यां न मम'।।४।। 'ॐ सत्वन्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः।' 'ॐ सत्वन्नोऽअग्ने वमो भवोतीनेदिष्ठोऽअस्या उषसो व्युष्टौ। अवयक्ष्वनो व्वरुण ᳪरराणो वीहि मृडीकᳪ सुहवो नऽ एधि स्वाहा, इदमग्नीवरुणाभ्यां न मम' ।।५।। ॐ अयाश्चाग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता सर्वप्रायश्चित्तहोमे विनियोगः।' 'ॐ अयाश्चाग्ने श्यनभिशस्तिपाश्च सत्त्व-मित्वमयाऽअसि । अयानो यज्ञं वहास्ययानो धेहि भेषजᳪ स्वाहा, इदमग्नये न मम'।।६।। 'ॐ ये ते शतमिति वामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वे मरुतः स्वर्का देवताः सर्वप्रायश्चित्तहोमे विनियोगः।' 'ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽअद्य सवितोत व्विष्णुर्व्विश्वे मुञ्चन्तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मरुतः स्वर्काः स्वाहा ।। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम' ।।७।।'ॐ उदुत्तममिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता सर्वप्रायश्चित्तहोमे विनियोगः।' 'ॐ उदुत्तमं व्वरुणपाशमस्मदवाधमं व्विमध्यम ँश्रथाय । अथावयमादित्यव्रते तवानागसोऽ अदितये स्याम ।। इदं वरुणाय न मम' ।।८।।

ततो ब्रह्माऽऽचार्यो वा वधूवरौ अभिषिञ्चेत्, तत्र मन्त्रौ- ''गणाधिनाथ-वरुण-ब्रह्मविष्णुशिवादयः । दम्पत्योः कुशलं कुर्युः पूजिता इह देवताः।। उत्सर्गे वारुणे चैव वरुणो विष्णुना सह। तुष्टिपुष्टिकरो भूयादुभयोः स्त्रीकुमारयोः ।।'' ('प्रजापत्यादिहोमसाङ्गतासिद्धये गोदानम्) ।।२।।

अथ राष्ट्रभृद्-ऋताषाडादि-होमः

'ॐ ऋताषाडिति प्रजापतिर्ऋषिर्यजुः ऋताषाडृतधामाग्निर्गन्धर्वो देवता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

होमे विनियोगः।' 'ॐ ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् । इदम् ऋताषाहे ऋतधाम्ने अग्नये गन्धर्वाय न मम' ।।१।। ॐ ऋताषाडिति प्रजापतिर्ऋषिः ओषधयोऽप्सरसो मुदा देवता यजुःहोमे विनियोगः। 'ॐ ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽ-प्सरसो मुदो नाम ताभ्यः स्वाहा । इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यो न मम' ।।२।। 'ॐ सᳺ हित इति प्रजापतिर्ऋषिर्यजुः सᳺ हितो विश्वसामासूर्योगन्धर्वोदेवता होमे विनियोगः।' 'ॐ सᳺ हितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् । इदं सᳺ हिताय विश्वसाम्ने सूर्याय गन्धर्वाय न मम' ।।३।। 'ॐ सᳺ हित इति प्रजापतिर्ऋषिः यजुः मरीचयोऽप्सरसः आयुवो देवता होमे विनियोगः'।। 'ॐ सᳺ हितो विश्वसामा सूर्योगन्धर्वस्तस मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा ।। इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यो न मम' ।।४।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'ॐ सुषुम्ण इति प्रजापतिर्ऋषिर्यजुः सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वो देवता होमे विनियोगः।' 'ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् ।। इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय न मम' ।।५।। 'ॐ सुषुम्ण इति प्रजापतिर्ऋषिः यजुः नक्षत्राण्यप्सरसो भेकुरयो देवताः होमे विनियोगः।' 'ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा ।। इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यो न मम' ।।६।। 'ॐ इषिर इति प्रजापतिर्ऋषिः यजुः इषिरोविश्वव्यचावातोगन्धर्वो देवता होमे विनियोगः।' 'ॐ इषिरो विश्वव्यचा व्वातो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् ।। इदम् इषिराय विश्वव्यचसे वाताय गन्धर्वाय न मम' ।।७।। 'ॐ इषिर इति प्रजापतिर्ऋषिः यजुः आपोप्सरस ऊर्जो देवता होमे विनियोगः।' 'ॐ इषिरो व्विश्वव्यचा वातो गन्धर्वस्त-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्यापोऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा ।। इदम् अद्भ्योऽप्सरोभ्य ऊग्भ्यों न मम' ।।८।। 'ॐ भुज्युरिति प्रजापतिर्ऋषिर्यजुः सुपर्णो यज्ञो गन्धर्वो देवता होमे विनियोगः।' 'ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वः स नऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् ।। इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय न मम' ।।९।। 'ॐ भुज्युरिति प्रजापतिर्ऋषिः यजुः दक्षिणाप्सरस्तावा देवता होमे विनियोगः।' 'ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ताभ्यः स्वाहा ।। इदं दक्षिणाभ्योप्सरोभ्यस्तावाभ्यो न मम' ।।१०।। 'ॐ प्रजापतिरिति प्रजापतिर्ऋषिर्यजुः प्रजापतिर्विश्वकर्मा मनो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्। इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय न मम ।।११।। 'ॐ प्रजापतिरिति प्रजा-पतिर्ऋषिः यजुः-ऋक्सामान्यप्सरस इष्टयो देवता होमे विनियोग।' 'ॐ प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा ।। इदम् ऋक्सामभ्योप्सरोभ्य एष्टिभ्यो न मम' ।।१२।। इति राष्ट्रभृद्धोमः ।। राष्ट्रभृद्धोमसाङ्गतासिद्धये गोदानम् ।। ततो वधूवरौ अभिषिञ्चेत् एतैर्मन्त्रैः- 'ॐ ऋताषाडा-द्याहुतिभिर्दद्यात् प्रीतो हुताशनः। आयुर्दीर्घं च सौख्यं च पुत्रपौत्रप्रवर्धनम् ।।१।। उत्सवे वारुणे चैव वरुणो विष्णुदेवता । कुरुतां सुखसौभाग्यमुभौ तावनयोर्द्वयम् ।।२।। पञ्चानां लोकपालानामृषीणां च ध्रुवस्य च । यत् कल्याणं तदनयोर्दद्यात् प्रीतो हुताशनः।।३।। गन्धर्वाप्सरसश्चैव प्रयच्छन्तु यशः श्रियम् । दीर्घमायुस्तथाऽऽरोग्यमुभयोर्वरकन्ययोः।।४।।

अथ जयहोमः

'ॐ चित्तं चेति परमेष्ठी ऋषिः चित्तं देवता यजुः जयहोमे विनियोगः।' 'ॐ चित्ताय स्वाहा - इदं चित्ताय न मम' ।।१।। 'ॐ चित्तिश्च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वाहा- इदं चित्त्यै न मम' ।।२।। 'ॐ आकूतं चेति परमेष्ठी ऋषिः आकूतं देवता यजुर्होमे विनियोगः।' 'ॐ आकूताय स्वाहा – इदमाकूताय न मम' ।।३।। 'ॐ आकूतिश्चेति परमेष्ठी ऋषिः आकूतिर्देवता यजुर्होमे विनियोगः।' 'ॐ आकूत्यै स्वाहा - इदमाकूत्यै न मम'।।४।। 'ॐ विज्ञातं चेति परमेष्ठी ऋषिर्विज्ञातं देवता यजुर्होमे विनियोगः।' 'ॐ विज्ञाताय स्वाहा - इदं विज्ञाताय न मम' ।।५।। 'ॐ विज्ञातिश्चेति परमेष्ठी ऋषिर्विज्ञातिर्देवता यजुर्होमे विनियोगः।' 'ॐ विज्ञात्यै स्वाहा- इदं विज्ञात्यै न मम' ।।६।। 'ॐ मनश्चेति परमेष्ठी ऋषिर्मनो देवता यजुर्होमे विनियोगः ।' 'ॐ मनसे स्वाहा – इदं मनसे न मम' ।।७।। 'ॐ शक्वरीश्चेति परमेष्ठी ऋषिः शक्वरी देवता यजुर्होमे विनियोगः।'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'ॐ शक्वर्यै स्वाहा –इदं शक्वर्यै न मम' ।।८।। 'ॐ दर्शश्चेति

परमेष्ठी ऋषिर्दर्शोदेवता यजुर्होमे विनियोगः।' 'ॐ दर्शाय स्वाहा – इदं दर्शाय न मम' ।।९।। 'ॐ पौर्णमासं चेति परमेष्ठी ऋषिः पौर्णमासं देवता यजुर्होमे विनियोगः।' 'ॐ पौर्णमासाय स्वाहा – इदं पौर्णमासाय न मम' ।।१०।। 'ॐ बृहच्चेति परमेष्ठी ऋषिर्बृहद्देवता यजुर्होमे विनियोगः।' 'ॐ बृहते स्वाहा – इदं बृहते न मम' ।।११।। 'ॐ रथन्तरं चेति परमेष्ठी ऋषी रथन्तरं देवता यजुर्होमे विनियोगः।' 'ॐ रथन्तराय स्वाहा – इदं रथन्तराय न मम' ।।१२।। 'ॐ प्रजापतिरिति परमेष्ठी ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता जयहोमे विनियोगः।' 'ॐ प्रजापति-र्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु । तस्मै विशः समनमन्त सर्वाः स उग्रः स इ हव्यो बभूव स्वाहा ।। ॐ प्रजापतये स्वाहा – इदं प्रजापतये न मम' ।।१३।। इति जयहोमः ।। अत्रापि जयहोमसङ्गतासिद्धये गोदानं कुर्वन्ति।। ततो वधूवरौ अभिषिञ्चेत्, तत्र मन्त्रौ -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"वधूवराभ्यां यच्छन्तु होमेनाऽनेन तर्पिताः । चिरमायुर्महत्त-जश्चित्ताद्यास्त्रिदिवौकसः ।।१।। गौरी लक्ष्मीस्तथेन्द्राणी लोपामुद्रा शुभप्रदा । कुर्युः सदाचारवतीं स्वतुल्यां कन्यकामिमाम्' ।।२।।

अथ अभ्यातानहोमः

'ॐ अग्निर्भूतानामिति प्रजापतिर्ऋषिरग्निर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ अग्निर्भूतानामधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देववहूत्या ँस्वाहा' - 'ॐ इदमग्नये भूतानामधिपतये न मम'।।१।। 'ॐ इन्द्रो ज्येष्ठानामिति प्रजापतिर्ऋषिरिन्द्रोज्येष्ठानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ इन्द्रो ज्येष्ठानामधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ँस्वाहा ।।' 'ॐ इदमिन्द्राय ज्येष्ठानामधिपतये न मम' ।।२।। 'ॐ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यमः पृथिव्या इति प्रजापतिर्ऋषिर्यमः पृथिव्या अधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।।' 'ॐ यमः पृथिव्या अधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳस्वाहा ।। इदं यमाय पृथिव्या अधिपतये न मम' ।।३।। अत्र प्रणीतोदकस्पर्शः ।। 'ॐ वायुरिति प्रजापतिर्ऋषिर्वायुरन्तरिक्षस्याधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ वायुरन्तरिक्षस्याधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायास्मिन्कर्मण्यस्यां देवहूत्या ꣳ स्वाहा ।। इदं वायवेऽन्तरिक्षस्याधिपतये न मम' ।।४।। 'ॐ सूर्योदिवोऽधिपतिरिति प्रजापतिर्ऋषिः सूर्योदिवोऽधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ सूर्योदिवोऽधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳस्वाहा ।। इदं सूर्याय दिवोऽधिपतये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न मम' ।।५।। 'ॐ चन्द्रमा नक्षत्राणामधिपतिः प्रजापतिर्ऋषिः नक्षत्राणामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ चन्द्रमा नक्षत्राणामधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्या-माशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ꣳस्वाहा ।। इदं चन्द्रमसे नक्षत्राणामधिपतये न मम' ।।६।। 'ॐ बृहस्पतिरिति प्रजापतिर्ऋषि-र्बृहस्पतिर्ब्रह्मणोऽधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ बृहस्पतिर्ब्रह्मणोऽधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽ-स्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ꣳस्वाहा ।। इदं बृहस्पतये ब्रह्मणोऽधिपतये न मम' ।।७।। 'ॐ मित्र इति प्रजापतिर्ऋषिर्मित्रः सत्यानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ मित्रः सत्यानामधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ꣳस्वाह ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदं मित्राय सत्या-नामधिपतये न मम' ॥८॥ 'ॐ वरुण इति प्रजापतिर्ऋषिर्वरुणोऽ-पामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ वरुणोऽ-पामधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायाम-स्मिन् कर्म्मण्यस्यां देवहूत्या ᳪस्वाहा ॥ इदं वरुणायाऽपामधिपतये न मम' ॥९॥ 'ॐ समुद्र इति प्रजापतिर्ऋषिः समुद्रः स्त्रोत्यानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ समुद्रः स्त्रोत्यानामधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ᳪस्वाहा ॥ इदं समुद्राय स्त्रोत्यानामधिपतये न मम' ॥१०॥ 'ॐ अन्नमिति प्रजापतिर्ऋषिरन्न ᳪ साम्राज्यानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ अन्न ᳪ साम्राज्यानामधिपति-स्तन्मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ᳪ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वाहा ।। इदमन्नाय साम्राज्यानामधिपतये न मम' ।।११।। 'ॐ सोम इति प्रजापतिर्ऋषिः सोम ओषधीनामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' ॐ सोम ओषधीनामधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ँस्वाहा ।। इदं सोमायौषधीनामधिपतये न मम' ।।१२।। 'ॐ सवितेति प्रजापतिर्ऋषिः सविता प्रसवानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ सविता प्रसवानामधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ँस्वाहा ।। इदं सवित्रे प्रसवानामधिपतये न मम' ।।१३।। 'ॐ रुद्र इति प्रजापतिर्ऋषिः रुद्रः पशूनामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ रुद्रः पशूनामधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ँस्वाहा ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदं रुद्राय पशूनामधिपतये न मम'।।१४।। अत्र प्रणीतोद-कस्पर्शः।।
'ॐ त्वष्टेति प्रजापतिर्ऋषिस्त्वष्टा रूपाणामधिपतिर्देवता पङ्क्तिश्छन्दः
अभ्यातानहोमे विनियोगः।' 'ॐ त्वष्टा रूपाणामधिपतिः स मा वत्वस्मिन्
ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या
ᳬस्वाहा ।। इदं त्वष्ट्रे रूपाणामधिपतये न मम' ।।१५।।'ॐ विष्णुरिति
प्रजापतिर्ऋषिर्विष्णुः पर्वतानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे
विनियोगः।' 'ॐविष्णुः पर्वतानामधिपतिः स मा वत्वस्मिन् ब्रह्मण्यस्मिन्
क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या
ᳬस्वाहा ।। इदं विष्णवे पर्वतानामधिपतये न मम' ।।१६।। 'ॐ
मरुत इति प्रजापतिर्ऋषिर्मरुतो गणानामधिपतयो देवता पङ्क्तिश्छन्दः
अभ्यातानहोमे विनियोगः।' 'ॐ मरुतो गणानामधिपतयस्ते मा वत्वस्मिन्
CC-0. Nepal Sanskrit Academy, Kathmandu Collection.
ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या

ॅंस्वाहा ।। इदं मरुद्भ्यो गणानामधिपतिभ्यो न मम' ।।१७।। 'ॐ पितर इति प्रजापतिर्ऋषिः पितरः पितामहाः परेऽवरे ततास्ततामहा देवताः पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।' 'ॐ पितरः पितामहाः परेऽवरे ततास्ततामहा इह मा वत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ॅंस्वाहा ।। इदं पितृभ्यः पितामहेभ्यस्ततेभ्यस्ततामहेभ्यो न मम'।।१८।। अत्र प्रणीतोदकस्पर्शः ।। अत्रापि अभ्यातानहोम-साङ्गतासिद्धये गोदानं कुर्यात् ।। ततो वधूवरौ अभिषिञ्चेत् ।। तत्र मन्त्रौ -

ॐ ब्रह्मा विष्णुस्तथा रुद्रो गुरुः शुक्रश्च भार्गवः ।
आयुर्दीर्घं च सौख्यं च प्रयच्छन्त्वनयोर्द्वयोः ।।१।।
अग्निर्भूरपि यज्ञेऽस्मिन् श्रीधरश्च श्रिया सह ।
दद्युः पुत्रान् सुखं लक्ष्मीं सौभाग्यमपि सर्वदा ।।२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

अथ गुप्ताहुतयः

वधूवरयोः पुरस्तात् प्रसारितेन पटेन वह्निं व्यवधाय - 'ॐ अग्निरैतु इत्यादीनां चतुर्णां मन्त्राणां प्रजापतिर्ऋषिः पञ्चानामपि त्रिष्टुप् छन्दः लिङ्गोक्ता देवता आज्याऽऽहुतिहोमे गुप्ताऽऽहुतिहोमे च विनियोगः।' 'ॐ अग्निरैतु प्रथमो देवतानाᳬं सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयᳬं राजा व्वरुणोऽनुमन्यतां यथेयᳬं स्त्री पौत्रमघं न रोदात् स्वाहा ।। इदमग्नये न मम' ।।१।। 'ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिर्विबुध्यतामियᳬं स्वाहा ।। इदमग्नये न मम' ।।२।। 'ॐ स्वस्ति नोऽ अग्ने दिव आ पृथिव्या विश्वानि येह्ययथा यजत्र । यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रᳬं स्वाहा ।। इदमग्नये न मम' ।।३।। 'ॐ सुगन्नु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पन्थां प्रदिशन्नऽएहि ज्योतिष्मद्धेह्यजरन्न आयुः । अपैतु मृत्युरमृतं न आगा द्वैवस्वतो नो ऽअभयं कृणोतु स्वाहा ।। इदं वैवस्वताय न मम' ।।४।। अत्र प्रणीतोदक-स्पर्शः ।। 'ॐ परं मृत्योऽ अनु परेहि पन्थां यस्तेऽअन्य ऽइतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजा ᳪरीरिषो मोत व्वीरान् स्वाहा ।। मृत्यवे न मम ।।५।। अत्र प्रणीतोदकस्पर्शः ।। इति गुप्ताहुतिः ।। अत्राऽपि गुप्ताहुतिसाङ्गतासिद्धये गोदानं कुर्वन्ति ।। प्रसारितं वस्त्रमुत्तार्य वधूवरौ अभिषिञ्चेत् पुरोहितः ।। तत्र मन्त्रः- 'ॐ गोविन्दो गोकुले तिष्ठन् गोपीभिर्विहरन् सह । तुष्टिपुष्टिकरो भूयादनयोर्वरकन्ययोः ।। इति ।।

अथ लाजहोमः

तत्प्रकारश्च । वधूर्वेद्याः पश्चिमतः प्राङ्मुखीभूय तिष्ठेत्, तस्या वामतो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वरस्तिष्ठेत्, घृताभिधारितानां शमीपलाशमिश्रितानां शूर्पे चतुर्भागतया पृथक् स्थापितानां लाजानां मध्ये, प्रथमभागतः भ्रात्रा अञ्जलिना प्रदत्तान् लाजान् अञ्जलौ गृहीत्वा, वरेण अन्वारब्धा वधूर्मन्त्रं पठित्वा त्रिवारं त्रिवारं जुहुयात् । तत्र मन्त्राः- 'अर्यमणामित्याथर्वण ऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवता लाजहोमे विनियोगः।' 'ॐ अर्यमणं देवं कन्या अग्निमयक्षत । स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा ।। 'ॐ इदमर्यम्णे न मम' ।।१।। इति प्रथमाऽऽहुतौ हुतायाम्, पुनः प्रथमभागतो भ्रात्रा दत्तान् लाजान् अञ्जलौ गृहीत्वा-'ॐ इयं नार्युपब्रूते लाजानावपन्तिका' आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ।।' 'ॐ इदमग्नये न मम' ।।२।। इति द्वितीयाऽऽहुतौ हुतायां, प्रथमभागतो भ्रात्रा दत्तान् लाजान् गृहीत्वा पुनः- 'ॐ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव । मम तुभ्यं च संवननं तदग्निरनुमन्यतामिय ंस्वाहा।।' 'ॐ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदमग्नये न मम' इति जुहुयात् ।।३।। ततो वरः वध्वाः दक्षिणहस्ताऽङ्गुष्ठं गृहीत्वा चतुरः मन्त्रान् पठेत्, तत्र मन्त्राः-"ॐ गृहणामीत्यादीनां चतुर्णां याज्ञवल्क्यभरद्वाजाथर्वणप्रजापतय ऋषयस्त्रिष्टुपुष्णिगनुष्टुब्यजुश्छन्दांसि पाणिग्रहणे विनियोगः।' 'ॐ गृहणामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथाऽऽसः । भगो अर्य्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः।।१।। ॐ अमोऽहमस्मि सा त्वꣳ सा त्वमस्यमोऽहम्, सामाहमस्मि ऋक् त्वं द्यौरहं पृथिवी त्वम् ।।२।। तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान् विन्दावहै बहून् ।।३।। ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ, पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्'' ।।४।।

ततोऽग्नेरुत्तरतः प्राङ्मुखीं वधूं कृत्वा पूर्वोपकल्पितायां ससिन्दूर-
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
रेखात्रयायां शिलायां वध्वा दक्षिणं पादाऽङ्गुष्ठं स्वदक्षिणकरेण गृहीत्वा

मन्त्रं पठन् आरोहयेत् वरः। तत्र मन्त्राः- "ॐ आरोहेममश्मानमित्याथर्वण ऋषिः अनुष्टुप्छन्दो वधूर्देवता अश्मारोहणे विनियोगः।" 'ॐ आरोहेममश्मानमश्मेव त्वꣳ स्थिरा भव। अभितिष्ठ पृतन्यतो बबाधस्व पृतनायतः।।' इति तस्यामारूढायां पुनः पठेद्वरः। 'ॐ सरस्वतिप्रेदमिति विश्वामित्र ऋषिः सरस्वती देवताऽनुष्टुप्छन्दः गाथागाने विनियोगः।' 'ॐ सरस्वति प्रेदमव सुभगे वाजिनीवति। यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः। यस्यां भूतꣳ समभवद्यस्यां विश्वमिदं जगत्, तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः।। इति।। ततो वरः वधूमग्रतः कृत्वा मन्त्रं पठन् प्रदक्षिणमग्निं परिक्रामेत्। तत्र मन्त्रः- "ॐ तुभ्यमग्न इत्याथर्वण ऋषिरग्निर्देवताऽनुष्टुप्छन्दः परिक्रमणे विनियोगः।" "ॐ तुभ्यमग्ने पर्यवहन्त्सूर्यां वहतु ना सह, पुनः पतिभ्यो जायां दाऽग्ने प्रजया सह।।" इति परिक्रम्य पूर्वं स्थानमागत्य पूर्ववत् समन्त्रपाठं वधूवरौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लाजहोमम्, अङ्गुष्ठग्रहणम्, अश्मारोहणम्, गाथागानम्, अग्निपरिक्रमणं च द्विवारं कुर्याताम् ।। एवं तृतीयपरिक्रमणे समापिते भ्रात्रा दत्तस्य शूर्पस्य कोणेन सर्वानेव लाजान् समन्त्रपाठं जुहुयात् ।। तत्र मन्त्रः - 'ॐ भगायेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दो भगो देवता लाजहोमे विनियोगः।' ''भगाय स्वाहा'' इति हुते 'ॐ भगाय न मम' इति वरो ब्रूयात् ।। ततस्तूष्णीं चतुर्थं परिक्रमणम् । तत्र आचाराद्वधूवरौ पूर्वप्रकल्पितां शिलामारोहणक्रमेण गन्धाक्षतपुष्पाण्यादाय पूजयेतामेभिर्मन्त्रैः- ''तमालपुष्पप्रतिमाङ्गि ! मातः!, सनालनीलोत्पलयुग्महस्ते !। स्फुरत्सरस्वद्-बृहदम्बरे ! त्वं, धरे ! समागच्छ वरं प्रदातुम् ।। ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री, पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः।। मातरं वसुधां देवीं पितरं च महेश्वरम् । आवां प्रपन्नौ स्वः कामान् प्राप्नुयाव यथेप्सितान् ।।१।। 'ॐ अश्मा च मे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम् ।।२।। देहल्यां स्थापिता सेयं भक्तितोऽभ्यर्चिता शिला । ददातु विपुलान् भोगान् पुत्रपौत्रादिसंयुतान् ।। 'ॐ स्थिरो भव वीड्वङ्गऽ-आशुर्भव वाज्यर्वन् । पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ।।३।। इति ।।

ततो वर उपविश्य ब्रह्मणाऽन्वारब्धः प्रजापतिं ध्यायन् आज्येन जुहुयात् । तत्र मन्त्रः- 'ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः।' ''ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ।।'' हुतशेषस्य आज्यस्य प्रोक्षणीपात्रे प्रक्षेपः ।। ततो वधूवरौ यथास्थानमागत्य उपविशेताम् । अत्रापि लाजहोमसाङ्गतासिध्यर्थं वध्वा गोदानं कारयन्ति।।

ततोऽष्टदिक्षु वस्त्रोपरि निन्मवत् पुञ्जीकृतैस्तण्डुलैर्लाजैर्वा प्रकल्पितान् अष्टौ पर्वतान् पूजयेतां वधूवरौ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ पर्वत-पूजनम् ।।



वधूवरौ गन्धाक्षतपुष्पाद्यैः क्रमशः पूजयेताम् । तत्र मन्त्राः- [१]. सुमेरुं काञ्चनमयं चतुःशृङ्गविराजितम् । मण्डलस्योत्तरे भागे चन्द्रमा इति पूजयेत् ।। ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो ऽअजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।। ॐ सुमेरुपर्वताय नमः ।।१।। [२] शिखरं च महादेवं पाण्डुरं हेमभूषितम् । ये ते शतमितीशाने विदिग्भागे प्रपू- जयेत् ।। ॐ ये ते शतं व्वरुण ये सहस्रं यज्ञियाः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पाशा वितता महान्तः । तेभिर्न्नो ऽअद्य सवितोत व्विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा ।। ॐ शिखराय नमः ।।२।। [३] उदयं पर्वतं पीतरक्तश्वेतं विभूषितम् । त्रातारमिति मन्त्रेण साधिष्ठातारमर्चये ।। ॐ त्रातारमिन्द्रम-वितारमिन्द्र ँ हवे हवे सुहव ँ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ँ स्वस्ति नो मघवा धात्विन्द्रः ।। 'ॐ उदयाचलाय नमः ।।३।। [४] समुन्नतं कृष्णवर्णं मरुतं नाम पर्वतम् । आग्नेय्यां स्थितमत्युग्रं मरुत्वानिति पूजये ।। ॐ मरुत्वाँऽ।। इन्द्र वृषभो रणाय पिबा सोम मनुष्यधम्म-दाय । आसिञ्चस्व जठरे मद्ध्वऽऊर्म्मिन्त्व ँ राजासि प्रतिपत्सुतानाम् । उपयाम गृहीतोसीन्द्रायत्वामरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ।। ॐ मरुताय नमः।।४।। [५] आरक्तश्वेतवपुषं दक्षिणस्यां दिशि स्थितम् । धामच्छदिति मन्त्रेण विन्ध्यं पर्वतमर्चये ।। ॐ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः । सचेतसो विश्वेदेवा यज्ञं प्रावन्तुनः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुभे ।। ॐ विन्ध्याचलाय नमः ।।५।। [६] नैर्ऋत्यामुषितं तुङ्गं मणिहेमादिभूषितम् । हिरण्यगर्भमन्त्रेण हिमवन्तं समर्चये ।। ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽ-आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।। ॐ हिमाचलाय नमः ।।६।। [७] पाण्डवैर्गुप्तचर्यार्थमाश्रितं पश्चिमे स्थितम् । धन्वनागेति मन्त्रेण वैराटं गिरिमर्चये ।। ॐ धन्वनागा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम । धनुः शत्रोरपकामङ्कृणोति धन्वना सर्वाः प्रदिशो जयेम ।। ॐ वैराटाय नमः ।।७।। [८] शारदं शुभ्रवर्णाढ्यं ज्ञानदं करुणायुतम् । वायव्यां दिशि वायव्यैर्व्वायव्यानिति पूजये ।। ॐ व्वायव्यैर्व्वायव्यान्याप्नोति स तेन द्रोणकलशम् । कुम्भीभ्यामम्भृणौ सुते स्थालीभिः स्थालीराप्नोति ।। ॐ शारदाय नमः ।।८।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ सप्तपदी (सातोटा प्रबल प्रतिज्ञा)

वेद्या उत्तरोत्तरतः आस्तृते वस्त्रे सिन्दूरादिभिः सप्त मण्डलानि कृत्वा, वधूम् उदङ्मुखीम् उत्थितां कृत्वा, तस्या दक्षपादाऽङ्गुष्ठं दक्षहस्तेन गृहीत्वा वरः सप्तपदानि क्रमेण समन्त्रपाठं क्रामयेत् । तत्र मन्त्राः- 'ॐ एकमिष इत्यादिसप्तानां प्रजापतिर्ऋषिर्यजुर्लिङ्गोक्ता देवता सप्तपदाक्रमणे विनियोगः।' 'ॐ एकमिषे विष्णुस्त्वा नयतु' (१) इति प्रथमे पदाक्रमणे मन्त्रः।। 'ॐ द्वे ऊर्जे विष्णुस्त्वा नयतु' (२) इति द्वितीये०।। 'ॐत्रीणि रायस्पोषाय विष्णुस्त्वा नयतु' (३) इति तृतीये०।। 'ॐ चत्वारि मायोभवाय विष्णुस्त्वा नयतु' (४) इति चतुर्थे०।। 'ॐ पञ्च पशुभ्यो विष्णुस्त्वा नयतु' (५) इति पञ्चमे ।। 'ॐ षड्ऋतुभ्यो विष्णुस्त्वा नयतु' (६) इति षष्ठे ।। 'ॐसखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयतु ।।७।। इति सप्तमे मन्त्रः।। ततस्तेषु सप्तसु मण्डलेषु क्रमेण सप्तऋषीन् वधूवरौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गन्धाक्षतपुष्पैः पूजयेताम् ।। तत्र मन्त्राः- "अत्रिं मुनिं सपत्नीकमावाह्य प्रथमे पदे । पत्न्याऽनयाऽभिनवया संयुक्तः पूजयाम्यहम् ।। 'ॐ आदित्यङ्गर्भं पयसा समङ्ग्धि सहस्रस्य प्रतिमां विश्वरूपम् । परिवृङ्ग्धि हर सा मा भिमᳫँ स्था: शतायुषं कृणुहि चीयमानः।। ॐ अत्रये नमः" ।।१।। "पदे द्वितीये सूर्येन्दुरूपं पत्नीसमन्वितम् । मुनिं वसिष्ठमावाह्य सदारः पूजयाम्यहम् ।। 'ॐ वातो वा मनो वा गन्धर्वाः सप्तविᳫँ शतिः । तेऽअग्रेश्वमयुजस्तेऽअस्मिञ्जवमादधुः ।। ॐ वसिष्ठाय नमः" ।।२।। "पदे तृतीयेऽङ्गिरसं मुनिवर्गसमर्चितम् । दम्पत्योर्जयदातारं सदारः पूजयाम्यहम् ।। ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह । बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ।। ॐ अङ्गिरसे नमः" ।।३।। "उद्भावितहरिश्चन्द्रमहिमानं मुनीश्वरम् । पदे चतुर्थे गाधेयं सदारः पूजयाम्यहम् ।। ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रत्नधातमम् ।। ॐ विश्वामित्राय नमः" ।।४।। "पराशरसुतं व्यासं मत्स्यगर्भात् समुद्भवम् । पञ्चमेऽत्र पदे प्रीतः सदारः पूजयाम्यहम् ।। "ॐ सोमो धेनुꣳ सोमोऽ अर्वन्तमासुसोमो व्वीरङ्कर्म्मण्यं ददाति । सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ।। ॐ व्यासाय नमः" ।।५।। "षष्ठे पदे भरद्वाजं मुनिं षडर्तुविग्रहम् । आवाह्य यज्ञरक्षायै सदारः पूजयाम्यहम् ।। ॐ वसन्तेनऽऋतुना देवा वसवस्त्रिवृताः स्तुताः ।। रथन्तरेण तेजसा हविरिन्द्रे व्वयो दधुः ।। ॐ भरद्वाजाय नमः" ।।६।। "सप्तमेऽत्र पदे शम्भोरंशभूतं मुनीश्वरम् । दुर्वाससं शुभाऽवाप्त्यै सदारः पूजयाम्यहम् ।। 'ॐ सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जाग्रतोऽअस्वप्नजौ सत्रसदौ च देवौ ।। ॐ दुर्वाससे नमः" ।।७।। इत्थं संपूज्य वधूवरौ सप्तब्राह्मणान् दक्षिणाभोजनादिभिः सन्तोषयेताम् ।। अस्मिन्नवसरे राजवंशविरुदावलिवेत्ता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

कश्चन ओजस्वी क्षत्रियादिः पुरुषः खड्गमुन्नीय साभिनिवेशं राजविजय-प्रशस्तिमुच्चैर्गायेदिति इदं राजविजयप्रशस्तिगानं 'खाँडो जगाउनु' इति नाम्ना व्यपदिश्यते ।। गोरक्षदेशाचारः।।इति सप्तपदी ।।

ततो वरः सपत्नीकोऽग्नेः पश्चिमतः स्थित्वा मौनिपुरुषस्कन्धस्थित-कलशजलेन साम्रपल्लवेन वधूं मूर्धन्यभिषिञ्चेत् ।। तत्र मन्त्राः- 'ॐ आप इति प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता यजुर्मूर्धाभिषेचने विनियोगः।' 'ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ।।' इति ।। पुनः 'ॐ आपोहिष्ठेतित्र्यृचस्य सिन्धुद्वीपऋषिर्गायत्री छन्द आपो देवता वधूमूर्धाभिषेके विनियोगः।' 'ॐ आपोहिष्ठा मयो भुवः, तानऊर्जे दधातनः, महेरणाय चक्षसे ।।१।। यो वः शिवतमो रसस्तस्य भाजयतेह नः, उशतीरिव मातरः ।।२।। तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ, आपो जन यथा च नः।। इति अभिषेक मन्त्राः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ दिवा विवाहे वरः वधूं 'सूर्यमुदीक्षस्व' इति प्रैषेण (करले) सूर्यं दर्शयेत्। तत्र मन्त्रं स्वयं पठेत् - 'ॐ तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिः ब्राह्मी त्रिष्टुप् छन्दः सूर्यो देवता सूर्योदीक्षणे विनियोगः।' 'ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शत१ँ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।।इति।। 'उदैक्षिषि' इति कन्या ब्रूयात् ।। रात्रौ विवाहे तु 'ध्रुवमुदीक्षस्व' इति वरो ध्रुवं दर्शयेत्, मन्त्रं च स्वयं पठेत् - 'ॐ ध्रुवमसीति प्रजापतिर्ऋषिर्ध्रुवो देवता पङ्क्तिश्छन्दः ध्रुवोदीक्षणे विनियोगः।' 'ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि । मह्यं त्वादाद्बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतम् ।। इति ।। वधूश्च ध्रुवमवीक्षमाणाऽपि 'उदीक्षे' इति ब्रूयात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

अथ वरः वध्वाः दक्षिणस्कन्धतो हस्तं नीत्वा तस्याः हृदयमालभेत ।

तत्र मन्त्रः- 'ॐ मम व्रत इति मन्त्रस्य प्रजापतिर्ऋषिर्देवता च त्रिष्टुप्छन्दः वधुहृदयालम्भने विनियोगः ।' ''ॐ मम व्रते ते हृदयं दधामि मम चित्तं तेऽअस्तु, मम वाचमेकमना जुषस्व प्रजापतिस्त्वा नियुनक्तु मह्यम्'' ।।इति।।

अथ सिन्दूरार्पणम्

सिन्दूरार्पणविधानं कन्यापक्षीयाः पितृबान्धवा न पश्येयुरिति शिष्टाचारः ।। ऐशान्यां स्थापिताद् गणेशादारभ्य वधूसीमन्त (सिउँदो) पर्यन्तं उभयपक्षीये वस्त्रद्वये सधवाभ्यां वा कन्याभ्यां प्रसारिते सति, वर उत्थाय सिन्दूरपात्रं वामहस्तेन धृत्वा, गणेशादिभ्यो देवताभ्यः सिन्दूरं समर्प्य त्रिरुत्क्षिप्य गणेशात् वस्त्रद्वयोपरि अविच्छिन्ना सिन्दूररेखा प्रवर्तयन् वधूसमीपमागत्य- 'ॐ सुमङ्गलीति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवताऽभिमन्त्रणे विनियोगः।' 'ॐ सुमङ्गलीरियं वधूरिमाꣳ समेत पश्यत।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सौभाग्यमस्यै दत्त्वा याथास्तं विपरेत नः ।।' इति मन्त्रेण पुनः पुनश्च तथैव त्रिवारं सीमन्तदेशे सिन्दूरं निःक्षिप्य (हालेर) ललाटमध्यं च सिन्दूरबिन्दुविभूषितं कृत्वाऽवशिष्टसिन्दूरसहितं पात्रं सकन्थं (थैलीसहित) तस्यै दद्यात् ।। तत्पश्चात् तूष्णीमेव मङ्गलसूत्रम् (पोते), ललन्तिकाम् (तिल हरी) च क्रमेण तस्याः गले परिधापयेत् ।।

अथ (अब ठाउँ सार्ने) वरः कन्यामुत्थाप्य वा कन्या स्वयम् उत्थाय 'ॐ इह गाव इति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवता उपवेशने विनियोगः।' 'ॐ इह गावो निषीदन्त्विहाश्वा ऽइह पूरुषाः । इहो सहस्रदक्षिणो यऽ इह पूषा निषीदतु'- इति मन्त्रं पठन् स्वस्य स्थाने उपवेश्यते, स्वयं च वधूस्थाने उपविश्यते। उपविष्टा वधूश्च वरस्य वस्त्रान्तमाकृष्य 'स्थीयताम्' इति वदन्ती तं स्वदक्षिणत उपवेशयेत्, पादयोः प्रणमेच्च ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ वरः आचार्याय गोयुगं (गां वा) दद्यात् । गोयुगं (गां वा) ब्राह्मणं च संपूज्य कुशादीन्यादाय पूर्वसंकल्पसिद्धिरस्तु इत्युक्त्वा 'अमुक गोत्रः अमुक शर्माऽहम् कृतस्यैतावतो वैवाहिकस्य कर्मणः साङ्गता-सिद्धये रुद्रदेवताकम् इदं गोयुगं (इमां रुद्रदेवताकां गां वा) अमुक गोत्राय अमुक शर्म्मणे ब्राह्मणाय तुभ्यं संप्रददे' इति दद्यात् । ब्राह्मणश्च कोदादिति, स्वस्तीति च ब्रूयात् । यजमानस्तु कपिले० इति गां प्रार्थ्य, गोदानदानप्रतिष्ठाद्रव्यं दद्यादिति ।।

अथ मधुपर्क (माहुर) प्राशनमाचारात्

दधिमधुघृतं पिहितं कांस्यपात्रे समानीतं वह्नौ तापितं पुरस्तात् कृत्वा पिधानमपसार्य वधूवरौ समालोडयेताम् (फेटून्)।। कनिष्ठिकया समं विभज्य अहं- पूर्विकामालम्ब्य मन्त्रपाठं विनैव परस्परं प्राशयेतां च । वरस्य विजये यथा- समयं पूर्वं कन्यासन्ततेरुत्पत्तिः, वध्वास्तु विजये पूर्वं पुत्रोत्पत्तिरिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्राम- जरतीनां वचसि श्रद्धावती वार्ता ।। ततः हस्तौ प्रक्षाल्य आचामेताम् च ।।

अथाऽऽदित्यदुहिता शैलराजदुहिता च (पाशा खेल्ने)।। वधूवरौ परस्परं संमुखीभूय यथासुखं स्थित्वा सपण (ठिनी) विन्यासं दीव्येताम् अक्षैः। तयोरुपरि उभयपक्षीयं वस्त्रं प्रसार्य, तत्र लाजान् प्रक्षिप्य, चामराभ्याम् आलोडयेताम् डौलाउनू च कलशवाहिन्यौ केचन अन्ये वा स्त्रियौ यावत् न मन्त्रपाठः समाप्यते तावत् ।। आचार्यः- "ॐ तपस्तेजसा प्रभाविता जटाभाराजिनसंछन्नाऽऽ-दित्यदुहिता बहूनि वर्षाणि ततापं । तेजसा तपन्ती च सा तपतीति विख्याता बभूव । अथैकदा सन्नद्धधन्वा सेनया सहितो वने विचरन् धृतातपत्रो नृपः संवरण उपसृत्याऽवोचत् प्रेक्षन्तीं सुभ्रुवं नीलकेशीं यौवनवतीं पीनस्तनीं पृथुश्रोणीं ताम् । हे ! त्वं कस्याऽसि किं नामा दुहितेति । सा होवाच, यस्यैकचक्रं भुजगनियमितं सप्ताश्वमचरणेन सारथिनाऽरुणेन प्रणुद्यमानं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्यन्दनं, य एष भ्राजमानः प्रातरुद्याति, तस्याऽहं दुहिताऽऽशीर्ना-मेति । देवरूपी कुण्डलाभरणो महाबाहुः कस्त्वं भोः ! कया कामनया मामित्यादरेण पृच्छसीति ।। स होवाच तस्याऽअमृतोपमां वाचं निशम्य नृपवरः सुन्दरि ! नृपः संवरणोऽहं भार्या मे भव रूपिणीति श्रुत्वा सा होवाच य एवं मामजीजनत् तं गत्वा तेजोराशिमुद्यन्तं भास्करं वृणुष्व इति । स निशितैः कामशरैस्तुद्यमानः स्वपुरोहितं भगवन्तं वसिष्ठमुपातिष्ठत, मदर्थे तां ब्रध्नं वृणुष्व इति । स होवाच ब्रध्नस्तेन गत्वा ऋग्भिर्यजुर्भिः सामभिःस्तूयमानो वसिष्ठो यङ्कामं कामयसे तत् ते दास्यामीति ।। स होवाच स एष कामो याज्यो मे नृपः संवरणस्तस्यार्थे दुहितरं ते वृणोमीति । दत्तेति स होवाच प्रतिगृहाणेति । अथ वसिष्ठस्तां वाचमनुश्रुत्य तुष्टः प्रतीचीं दिशमागतस्तत्सर्वं तस्मै निवेदयामास । अथ तेन निवेदिते सुदिने सुमुहूर्ते सुनक्षत्रे सुयोगे पुण्याहे पाणिं जग्राह संवरणः पाणिनाऽऽदौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पित्रानुमङ्गलं प्रदत्तम् । उभावध्वर्युरन्वारेभे । कुशैर्लाजैः शमीपलाशैः समिद्भिः समन्त्रं हव्यवाहे हूयमाने देवतानामृषीणां गन्धर्वाणामप्सरसां सतां पश्यतां मङ्गलध्वनिभिर्ऋग्यजुः-सामाथर्वाङ्गिरसेतिहासपुराणमन्त्र-ध्वनिमिलितैः सनृत्यवादित्रगीतैर्विवाहः संवृत्तः। अथ हैतद्भानुर्धनं ददौ, गोऽश्वानां दासीनां महिषीणामजाविकानां कुञ्जराणां शतं साहस्रं वस्त्रमपरिमितं रजतं काञ्चनम् । तद्गृहीत्वा स्वपुरं रथेन वाजिभिर्युक्तेन गच्छन्तौ संमोदमानौ दम्पती जगाद तौ भानुः- भोः संवरण धरणीपते तपती नाम सेयं भार्या ते संवृत्ता, शृणुतं मद्वाक्यम् - ब्राह्मणवत्सलो भव, एषा ते दारक दारिका अविधवा अष्टपुत्रा जीववत्सा अनुत्तरवादिनी प्रेषकारिणी सत्यवादिनी ब्राह्मणस्तवा दैवतस्तवा मातरं संत्यज्य पितरं सन्त्यज्य भ्रातृन् सन्त्यज्य भर्तारमर्चितं सुपूजितं चाऽनुयाति त्वाम् । यथेन्द्रस्येन्द्राणी, यथा दशरथस्य कौसल्या, यथा रामस्य सीता, यथा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

रावणस्य मन्दोदरी, यथा बलिनश्च तारा, यथा वायोश्चाञ्जनी, यथा नलस्य दमयन्ती, यथा सौदासस्य मदयन्ती, यथा पुरूरवस उर्वशी, यथा पुरुकुत्सस्य नर्मदा, यथा शन्तनोश्च गङ्गा, यथा धृतराष्ट्रस्य गान्धारी, यथा पाण्डोश्च कुन्ती, यथा पाण्डवानां द्रौपदी, यथा भीमसेनस्य हिडिम्बा, यथाऽर्जुनस्य सुभद्रा, यथा दुर्योधनस्य भानुमती, यथाऽऽदित्यस्य ममच्छाया, यथा चन्द्रस्य रोहिणी, यथा गणेशस्य सिद्धिबुद्धी, यथाऽगस्त्यस्य लोपामुद्रा, यथा योगेश्वरस्य मैत्रेयी, यथा वसिष्ठस्याऽरुन्धती, यथाऽत्रेरनसूया, यथा ब्रह्मणः सावित्री, यथा कृष्णस्य रुक्मिणी, यथा पशुपतेरुमा, यथा गौतमस्याऽहल्या, यथा हिमालयस्य मेनका, यथैवमन्येषामन्या, तथा तवेयमनुगामिनीति ।।१।। अथ शैलराजगृहे मेनका कन्यकां प्रजातां, कपर्दिने भवाय प्रत्तां च तां दुहितरं सा होवाच पत्यौ शृण्वति, अविधवा सुभगा कल्याणवती धनवती पुत्रवती यौवनवती यशोवती भवेति भवः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

होवाच श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ।। इति ।। अथ भवः प्रत्युवाच सदा सुप्रीता सरदा भव, अथात इयं सर्वमङ्गला भूयात्, माहेन्द्रीव वारुणीवोत्तमानि लप्सीष्ट शोभनानि, नाहमेनां जह्याम् ।। त्रैलोक्ये सन्ति ये देवि ब्रह्मविष्ण्वादयः सुराः । एते त्वत्साक्षिणस्त्वं मेऽभवः प्रागङ्गना सती ।। त्यज्यते समयान्माता त्यज्यन्ते भ्रातरोऽपि वा । त्यज्यन्ते बान्धवाः सर्वे नाऽङ्गना सहगामिनी ।। न रोचयेऽश्वं न गजं हिरण्यं, कौशेयवासो विविधं च रत्नम् । शुद्धा कन्या करगा शैलभर्तस्तव प्रसादान्मम शंकरस्य।। लोके कीर्तिः कुले वृद्धिर्लक्ष्मीश्च गृहमागता । स्त्रीरत्नं च मया प्राप्तं त्वत्प्रसादाद्धिमालय ।। यद्यत्कल्याणकृल्लोके या च भक्तिरधोक्षजे । आवयोर्दत्तचित्तानां सर्वं भवतु तत्सदा ।। इति ।। अत्राऽवसरे वधू-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वरयोरुपरि लाजान् आलोडयन्त्यौ द्वे नार्य्यौ तत् वस्त्रं परस्परे बलादाकर्षयतः विजेत्री गृहणाति च।। इत्यादित्यदुहिता, शैलराजदुहिता च ।।

अथ ग्रहतिलकम् (टीका)

वधूवरयोरभिमूखीभूतः कश्चन ब्राह्मणः सदधिसिन्दूराक्तैरक्षतैः पूर्वं वरस्य तैरेव पश्चाद्वध्वा ललाटे प्रतिमन्त्रान्तं तिलकं कुर्यात् ।। तत्र मन्त्राः- (पटकैपिच्छे टीका लिएर पहिले आधा वरलाई र बचेको आधा वधूलाई लाइदिनू।)

"ॐ गजाननः पाशसनाथपाणी, रक्ताम्बरो ह्युन्दुरुवाहनश्च ।
लड्डूकहस्तो हि गणाधिनाथो, वरस्य वध्वा वितनोतु भूतिम् ।।१।।
हंसाधिरूढः सचतुर्मुखः सः, कमण्डलुर्यज्ञपवित्रदेहः ।
इन्द्रादिदेवैरभिपूजितश्च, वरस्य वध्वा वितनोतु भूतिम् ।।२।।
शङ्खं गदां चक्रसरोरुहे च, करैर्दधानो गरुडाधिरूढः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जगत्पतिर्दिक्पतिपूजितश्च, वरस्य वध्वा वितनोतु भूतिम् ।।३।।
गङ्गाधरो भस्मजटाधरश्च, ललाटचन्द्रो वृषवाहनश्च ।
त्रिशूलखट्वाङ्गधरो महेशो, वरस्य वध्वा वितनोतु भूतिम् ।।४।।
त्रिवेदमूर्तिर्जगदेकचक्षुर्, विरञ्चिनारायणशङ्करात्मा ।
प्रभाकरश्चाऽखिललोकहेतु-र्वरस्य वध्वा वितनोतु भूतिम् ।।५।।
कलानिधिः कैरववर्गबन्धुः, कम्बुद्युतिः पुण्यविवृद्धिहेतुः ।
महौषधीशो रजनीपतिश्च, वरस्य वध्वा वितनोतु भूतिम् ।।६।।
महीतनूजो महिमाऽतिधीरः, सदा बलीयान् सततं पुराणः ।
हिरण्यवर्णः कनकाऽभिधानो, वरस्य वध्वा वितनोतु भूतिम् ।।७।।
शशाङ्कसूनुर्गुणपूर्णनामा, सुखादिहेतुर्व्यसनापहारी ।
बुधश्च विज्ञानविचक्षणोऽसौ, वरस्य वध्वा वितनोतु भूतिम् ।।८।।
समस्तविज्ञानगुरुर्मनीषः, सुरेन्द्रपूज्यः सुजनैकगम्यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बृहस्पतिर्मङ्गलनामधेयो, वरस्य वध्वा वितनोतु भूतिम् ।।९।।
तेजोऽधिकश्चाऽखिलखेचराणां, शुक्रः सुदीप्तः सुरशत्रुपूज्यः।
यशोधनोऽसौ मृतजीवकश्च, वरस्य वध्वा वितनोतु भूतिम् ।।१०।।
समस्तखेटोपरिमार्गगामी, शनैश्चरः सन्ततमादरेण ।
अस्मिन् सुलग्ने समुपागतः सन्, वरस्य वध्वा वितनोतु भूतिम् ।।११।।
यो धावतेऽद्यापि सुधाशनः सन्, तमोमयश्चन्द्रमसं च सूर्यम् ।
स्वयं बली लब्धवरः स राहुर्- वरस्य वध्वा वितनोतु भूतिम् ।।१२।।
समस्तसंपत्समवाप्तिहेतुः, केतुः प्रपन्नार्तिहरोऽत्र लग्ने ।
भूत्वाऽर्धमूर्तिः क्षितिसौख्यकर्ता, वरस्य वध्वा वितनोतु भूतिम् ।।१३।।
सुधूम्रवर्णश्चलसप्तजिह्वः, शाण्डिल्यपुत्रः स धनञ्जयश्च ।
शृङ्ग्र्याख्यगोत्रो ह्यरणीप्रसूश्च, वरस्य वध्वा वितनोतु भूतिम्।।१४।।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
सिंहाधिरूढा वरचापखड्गा, शूलारिखेटेष्वहियुक्तबाहुः ।

त्रैलोक्यमाता सुचिराय दुर्गा, वरय वध्वा वितनोतु भूतिम् ।।१५।।
सुराश्च सर्वे ग्रहदेवताश्च, सप्तर्षयो दिक्पतयो नगाश्च।
सयोगवारास्तिथयोऽखिलाश्च, वरस्य वध्वाश्च शुभानि कुर्युः ।।१६।।
ये यन्निदेशादिह कर्तुमीशा, ये यन्निदेशादपि हर्तुमीशाः।
ते तन्निदेशादनयोः शुभानि, प्रत्यर्प्य गच्छन्तु यथावकाशम् ।।१७।।

।। इति ग्रहतिलकम् ।।

ततोऽग्निस्थापनोक्तं शेषं होमं समाप्य ब्रह्मणाऽन्वारब्धो होता- 'ॐ अग्नये स्विष्टकृत इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता स्विष्टकृद्धोमे विनियोगः।' 'ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते न मम' ।। ततो वरः संस्रवं प्राश्य आचामेत् । अत्रैव दधिगुडप्राशनमाचमनं चाऽऽचारात् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततः पूर्णपात्रदानम् ।। षट्पञ्चाशदुत्तरशतद्वयम् (२५६) मुष्टिपरिमितं

(बहुभोक्त्रेकपुरुषभोजनपर्याप्तं वा) सफलं सब्रह्मसूत्रं सद्रव्यमन्नमुपनीय वरः कुशादीन्यादाय- 'ॐ अद्यकृतस्य विवाहहोमादिसकलकर्मणः अपूर्णस्य सतः पूर्णार्थमिदं ब्रह्मसूत्रद्रव्यफलसहितं पूर्णपात्रं प्रजापतिदैवतं अमुक गोत्राय अमुक शर्म्मणे ब्रह्मस्वरूपाय ब्राह्मणाय तुभ्यमहं संप्रददे, ॐ तत्सन्न मम' । इत्युच्चार्य दद्यात् ।। स्वस्तीति ब्राह्मणः ब्रूयात् ।।

ततः प्रणीताविमोकः- 'ॐ सुमित्रिया न इति द्वयोर्यजुषोः प्रजापतिर्ऋषिरापो देवताः प्रणीताविमोके विनियोगः।' 'ॐ सुमित्रिया न ऽआप ऽओषधयः सन्तु' इति सपवित्रेण प्रणीताप्रोक्षण्योर्जलेन वधूवरौ अभिषिञ्च्य 'ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च व्वयं द्विष्मः'।। इति ऐशान्यां प्रणीतापात्रं न्युब्जीकुर्यात् ।। तत आस्तरणक्रमेण बर्हिरुत्थाप्य- 'ॐ देवा गातु विदो गातुं वित्त्वा गातुमित । मनसस्पत इमं देवं यज्ञ ँ स्वाहा वाते धाः' ।। इति जुहुयात् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

।। इति प्रणीताविमोकः।।

अथ पूर्णाहुतिः

सपत्नीकेन वरेण पादयोरन्वारब्धो होता उत्थाय ब्रह्मणा सहितः स्रुवे फलादिकं निधाय अविच्छिन्नया घृतधारया- 'ॐ मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् । कवि१ सम्राजमतिथिञ्जनानामासन्नापात्रं जनयन्त देवाः स्वाहा'।। इति जुहुयात् ।।१।। ततः एधोस्येति वधूवरकर्तृको घृताभिघारितचरुसहितवस्त्रहोमः- 'ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि । समाववर्ति पृथिवी समुषाः समुसूर्यः समु विश्वमिदं जगत् । व्वैश्वानरज्योतिर्भूयासं विभून् कामान् व्यश्नवै भूः स्वाहा ।।२।। ॐ अभ्यादधामि समिधमग्ने व्रतपते त्वयि, व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितोऽअहम् । यत्र ब्रह्म च क्षत्रञ्च सम्यञ्चौ चरतः सह, तँल्लोकं पुण्यं प्रज्ञेयं यत्र देवाः सहाग्निना ।।३।। यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह । तँल्लोकं पुण्यं प्रज्ञेयं यत्र सेदिर्न्नविद्यते स्वाहा ।।४।। इति ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

ततः स्रुवेण दग्धं चरुमानीय दक्षिणकराऽनामिकया- 'ॐ त्र्यायुषं जमदग्नेः' इति ललाटे' 'ॐ कश्यपस्य त्र्यायुषम्' इति ग्रीवायाम्, 'ॐ यद्देवेषु त्र्यायुषम्' इति दक्षिणबाहुमूले, 'ॐ तन्नोऽअस्तु त्र्यायुषम्' इति हृदि वरस्य वध्वाश्च त्र्यायुषं कुर्यात् ।।

ततः कुङ्कुमादिरक्तं रक्तपुष्पादियुक्तं सदीपं सवस्त्रं सदक्षिणं क्षेत्रपालबलिं वधूवरौ नीराज्य ब्राह्मणेन शूद्रेण वा चतुष्पथे क्षेपयेत् । तत्र वाक्यम् - 'ॐ क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशाकिनी-डाकिनीवेतालादिपरिवार-युताय इमं बलिं समर्पयामि, भो भो क्षेत्रपाल इमं बलिं गृहाण मम यजमानस्य सपत्नीकस्य आयुष्कर्ता क्षेमकर्ता पुष्टिदस्तुष्टिदो भव।।' इति।।

अथ घृतच्छाया

कांस्यपात्रं सघृतसुवर्णमुपनीय दूर्वाभिर्वरोऽभिमन्त्रयेत्- 'ॐतेजोसि शुक्रमस्यमृतमसि धामना मासि प्रिय देवानामनाधृष्ट देवयजनमसि, तेजोऽसि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुक्रममृतमायुष्याऽआयुर्मे पाहि, देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे' ।। ततो दूर्वाभिः संमार्जयेत्- 'ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च' ।। इति ।।

ततश्छायां पश्येत्- 'ॐ अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् । तत् सर्वं शमयाऽऽज्य त्वं लक्ष्मीं पुष्टिं च वर्धय ।। आज्यं तेजः समुद्दिष्टमाज्यं पापहरं शुभम् । आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः ।। भौमान्तरिक्षं दिव्यं वा यन्मे किल्विषमागतम् । सर्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु' ।। इति ।।

ततः कुशादीन्यादाय - 'ॐ अद्य अमुक गोत्रस्य सदारस्य अमुक शर्म्मणो मम दुःस्वप्नदुर्निमित्तविघ्नौघशमनार्थं तेजःप्रज्ञाशौर्ययशोबलाऽऽयुर्लक्ष्मीपुष्टिवृद्ध्यर्थमिदमवलोकितमुखमण्डलच्छायं ससुवर्णं कांस्य-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पात्रस्थितमाज्यं मृत्युञ्जयदैवतम् अमुक गोत्राय अमुक शर्मणे तुभ्यमहं संप्रददे' ।। इति दद्यात् ।।

ततः प्रार्थयेत् - 'ॐकामधेनोः समुद्भूतं देवानामुत्तमं हविः। आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम्' ।। इति ।। ततो दानप्रतिष्ठाद्रव्यं सकुशोदकमादाय- 'ॐअद्यकृतैतत् ससुवर्णकांस्यपात्रस्थिताऽवलोकितमुखच्छायाऽऽज्यदानकर्मणः साङ्गतायै इदम् अमुकद्रव्यम् अमुक दैवतं दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे।।' इति दद्यात् ।।

अथ गोदानम् ।। ततो वरः सपत्नीकः आचार्याय वरत्वेन गां तन्निष्क्रयद्रव्यं वा सङ्कल्प्य दद्यात् । गां निष्क्रयद्रव्यं वा उपनीय- 'ॐ नमो गोभ्य० इति गां, नमो ब्रह्मण्यदेवाय० इति ब्राह्मणं च संपूज्य कुशादीन्यादाय पूर्वसंकल्पसिद्धिरस्तु इत्युक्त्वा - 'अमुक गोत्रः अमुक शर्मा सपत्नीकोऽहं कृतस्य वैवाहिक-होमादिकर्मणः साद्गुण्यद्वारा यथोक्तफलाऽवाप्तये इमां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गां रुद्रदैवतां (इदं रुद्रदैवतं गोनिष्क्रयीभूतं रजतद्रव्यं चन्द्रदैवतं, ताम्रद्रव्यं सूर्यदैवतं वा) अमुक गोत्राय अमुक शर्म्मणे आचार्याय तुभ्यमहं संप्रददे, ॐ तत्सन्न मम' ।। इति दद्यात् ।। 'स्वस्ति, कोदात् इति आचार्यः ।। ततः वरः कपिले० इत्यादिना गां प्रार्थ्य दानप्रतिष्ठाद्रव्यं सकुशोदकं समादाय- 'ॐ अद्य कृतैतद्गोदानगोनिष्क्रयीभूतद्रव्यदान-साङ्गतासिद्धये इदं द्रव्यम्० इत्यादि वाक्यं समुच्चार्य दद्यात् ।।

ततो भूयसीं दक्षिणामुपनीय- 'ॐ देयद्रव्याय नमः' इति संपूज्य कुशादीन्यादाय- पूर्वसंकल्पसिद्धिरस्तु इत्युच्चार्य - 'ॐ अद्यकृतैतद्वैवाहिकपूजनहवनादिसकलकर्मणः साङ्गतासिद्ध्यर्थमिमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य दातुमहमुत्सृजे' ।। इति भूमौ निधाय यथार्हं विभज्य दद्यात् ।। कन्यापिताऽपि कन्याविवाहसाङ्गतायै पूर्णपात्रं, गां, भूयसीं च दद्यात् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत आचार्य आवाहितान् देवान् संपूज्य -'यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् । इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च' ।। इति विसर्जयेत् ।।

ततश्च आचार्यादयो ब्राह्मणाः संभूय सपत्नीकं वरम् कलशजलेन -'ॐ सर्वे समुद्राः सरित० इत्यादिकैः पौराणैः, 'देवस्य त्वा सवितुरित्यादिभिः, द्यौःशान्तिरित्यादिभिर्वा वैदिकैर्मन्त्रैरभिषिच्य पुष्पादिकं रक्षाप्रतिसरं च गृहीत्वा - 'ॐ आब्रह्मन्० इत्यादिकान् मन्त्रान् पठित्वा प्रसादं साशीर्वचन-मुभाभ्यां दद्यात् ।। इति विवाह-पद्धतिः ।।

छोरी अन्भाउँदा र बुहारी ढुकाउँदा गर्ने विधि

अथ यथाचारं कृतभोजनौ विश्रान्तौ यथासमयं धृतवस्त्राभरणौ वधूवरौ सज्जीकृतविसर्जनोपचारं सन्निहितश्वश्रूश्वशुरादिपरिवारं वैवाहिकं देवाऽऽगारं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रविश्य आसने देवाभिमुखौ उपविश्य पाणी प्रक्षाल्य, पुष्पाञ्जलिमादाय, 'नमोस्त्वनन्ताय सहस्रमूर्तये, सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते, सहस्रकोटीयुगधारिणे नमः ।।' 'दीपनारायणाय नमः' इति दीपाय, ततः 'वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।। विघ्नेश्वराय वरदाय सुरप्रियाय, लम्बोदराय सकलाय जगद्धिताय । नागाननाय श्रुतियज्ञविभूषिताय, गौरीसुताय गणपाय नमो नमस्ते ।। श्रीमन्मङ्गलमूर्तये गणाधिपतये नमः।।' इति गणेशाय पुष्पाञ्जलिं समर्प्य, ततः 'नमो नमस्ते स्फटिकप्रभाय, सुश्वेतहाराय सुमङ्गलाय । सपाशहस्ताय झषासनाय, जलाधिनाथाय नमो नमस्ते ।।' 'वरुणाय नमः' इति वरुणाय, ततः 'ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लोकपा, कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी । वाराही घनघोरघर्घरमुखी ऐन्द्री च वज्रायुधा, चामुण्डा गणनाथरुद्रसहिता रक्षन्तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नो मातरः ।।' 'मातृकाभ्यो नमः' इति मातृकाभ्यः समर्पयेताम् ।।

ततः श्वश्रूर्जामातरं कन्यां च गन्धाक्षतैर्माल्यैश्चाऽलंकृत्य दधिकदलीफलादिकं शकुनं प्राशयेत् ।। पूगीफलयज्ञसूत्रद्रव्यसहितेन वस्त्रेण धर्मग्रन्थिं च बध्नन्ती कन्यासंरक्षणं च सविनयं प्रार्थयेत् ।। ततो वरः श्वश्रूप्रभृतीः समाश्वास्य प्रणम्य च, उभयपक्षीये कलशभारादिके पुरतः प्रस्थिते, पितृभ्रात्रादिभिः पृष्ठेन उह्यमानां वधूमग्रतः कृत्वा स्वयं च केनचिदुह्यमानः देवाऽऽगारात् गणेशादिकान् देवान् स्मरन् निष्क्रामेत् । कन्यापित्रादयश्च त्रिवारं भ्रामयित्वा कन्यां वरं च यथाक्रमं शिबिकादौ सहैव पृथ ग् वा निवेशयेयुः ।।

ततः संबन्धि (संधि) द्वयसंमेलनम् तौ ततः स्वपक्षीयान्, कृतवादनान् वादकजनान् कलशादिकाँश्च पुरस्कृत्य वधूमनु वरस्य प्रस्थानं गृहं प्रति ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वरपक्षे - मध्येमार्गम् वादकानां शिबिका-वाहकानां चोपरो-धस्तत्सन्तोषणञ्च ।।

ततो भवनाऽङ्गणं प्राप्तयोर्वरवध्वोर्भगिनीद्वयकर्तृक-नीराजनं (अर्ति सियाँली) तत्कर्तृको द्वारोपरोधस्तत्सन्तोषणं च । व्रीहिपुञ्जेषु तण्डुलपिष्टपात्रेषु तिलतैलेन प्रज्वालितानां षण्णां दीपानां चरणचङ्क्रमेण निर्वापणं कुर्वाणायाः वध्वा वैवाहिकदेवाऽऽगारप्रवेशः ।। सपत्नीकस्य वरस्य पूर्वावाहितपूजितदेवानां पूर्वरीत्या पुष्पाञ्जलिः ।। ततः श्वश्रूस्नुषयोः (सासूवुहारीको) कबरीद्वयसंयोजनं सह वसोः पवित्रमसि० इति वैदिकमन्त्रपाठ- सहितेन घृत (वसु) धारानिपातनेन ।। ततो वध्वाः श्वश्रूचरणयोर्वन्दनं सद्रव्यनिक्षेपम् । श्वश्रूकर्तृको वधूमुखावलोकश्च सति संभवे द्विगुणीकृतद्रव्यप्रत्यर्पणपूर्वकः ।। तत इतरासां तथैव वन्दनं तथैव च मुखावलोकः (समयान्तरेऽप्येतत्कर्म क्रियते) ।।

ततो वरमात्रा धर्मग्रन्थिमोचनम्, तदीयद्रव्यं निधाय स्नुषया सह धान्यैर्घटीस्थापन- पात्राधारीकृतैः अन्यैर्वा कैश्चन प्रस्थ (पाथी) संभरणम्,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तद्धान्यमादाय पुरस्थितया वध्वा पश्चात्स्थितया श्वश्वा च धान्यकोशे (भकारी नाम्नीपात्रे) स्थापनं च । परेऽहनि वध्वा सह वरस्य श्वशुरालये गमनं, तत्रैव च रात्रौ निवासः। प्रत्यागत्य परतरेऽहनि विवाहे शिलापूजाऽनुसारं शिलापुत्रस्य पूजनं, तस्य शय्यायां स्थापनं, मङ्गलपत्राऽन्वेषणं जले चेत्यादिकः सर्वोऽप्ययं पूर्वजैः प्रवर्तितो लौकिको विविधविधिकलापः कर्तव्यः ।। 'त्रिरात्र-मक्षारलवणाशिनौ स्याताम्, अधःशयीयाताम्, बाला चेत् संवत्सरं न मिथुनमुपेयाताम्, द्वादशरात्रम् षड्रात्रं त्रिरात्रमन्ततः, ग्रामवचनञ्च नकुर्युः, विवाहश्मशानयोर्ग्राम-प्रविशतात्, तस्मात् तयोर्ग्रामः प्रमाणम् । इत्यादीनि श्रुतिसूत्रकृद्वचनानि- 'येनाऽस्य पितरो याता येन याताः पितामहाः । तेन यायात् सतां मार्गं तेन गच्छन्न रिष्यते ।। इत्यादीनि स्मृतिवचनानि च नोपेक्षणीयानि कल्याण-कामैर्मतिमद्भिः ।। इति शुभम् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ चतुर्थीकर्मपद्धतिः

विवाहदिनाच्चतुर्थे दिने यथाऽऽचारं विवाहदिन एव वा सद्यः पक्षे विवाहमण्डपं तन्निष्क्रयप्रदानेन आचार्यतः स्वीकृत्य केचिदेतत् कर्म कुर्वन्ति ।

अथ चतुर्थीकर्म क्रियते ।। तत्र प्रयोगः ।। वधूवरौ अपररात्रे उद्वर्तनपूर्वकं यथाऽऽचारं युग (जुवा) काष्ठोपरि स्नापयित्वा वस्त्राऽऽभरणैः अलङ्कृत्य कर्मस्थाने प्राङ्मुखौ उपवेशयेत् ।। आचार्यः हस्तमात्रचतुरस्रां भूमिं कुशैः परिसमुह्य, तान् कुशान् ऐशान्यां निक्षिप्य, गोमयोदकेनोपलिप्य स्रुवमूलेन प्रागग्राः दक्षिणोपक्रमा उदगपवर्गास्तिस्रो रेखाः कृत्वा, उल्लेखनक्रमेण अनामिकाऽङ्गुष्ठाभ्यां त्रिरुद्धृत्य, वारिणा तं देशमभ्युक्ष्य, कांस्यपात्रेण वैवाहिकम् शिखिनामानम् अग्निमानीय प्रत्यङ्मुखं स्थापयेत् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततो वर आचम्य वरणसामग्रीं गन्धाक्षतपुष्पवस्त्रादिकां सकुशोदकां समादाय पूर्वसंकल्पमुच्चार्य 'अमुक गोत्रः अमुक शर्माऽहम् अद्यकर्तव्यचतुर्थी-होमकर्मणि कृताऽकृताऽवेक्षणादिकर्म कर्तुं नानानामगोत्रान्नानानामशर्मणो ब्राह्मणान् ब्रह्माऽऽचार्यत्वाऽऽदिना युष्मान् वृणे '।। इति वृत्वा, तान् गन्धाऽऽदिभिरभ्यर्च्य 'वृताःस्थ' इति ब्रूयात् ।। तैश्च 'वृताःस्मः' इत्युक्ते 'यथाविहितं कर्म कुरुत' इति ब्रूयात् ।। ते च 'करवामः' इति ब्रूयुः। अथ ब्रह्माणं वेद्या दक्षिणतः दर्भाऽऽसने उदङ्मुखं स्थापयेत् ।। ततः-आचार्यः कुशकण्डिकाम् अग्निस्थापनोक्तां विधाय आघारमम-पर्यन्तं कृत्यं निवर्तयेत् ।। ततः पूर्वोपकल्पितास्तिस्त्रः समिधोऽग्नौ तूष्णीं समुत्थाय प्रक्षिप्य सपवित्रेण प्रोक्षण्युदकेन अग्निं पर्युक्ष्य उपयमनकुशान् वामहस्ते कृत्वा पातितदक्षिणजानुः ब्रह्मणा कुशेनाऽन्वारब्धः समिद्धतमेऽ-ग्नौ स्त्रुवेण आघाराद्याश्चतस्त्र आहुतीर्जुहुयात् ।। तत्तदाहुत्यन्ते स्त्रुवाव-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थितहुतशेषं प्रोक्षणीपात्रे संस्रावयेच्च ।। तत्र मन्त्राः- 'ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता चतुर्थीकर्मणि आज्य-होमे विनियोगः।' 'ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम'। इति मनसा ।।१।। 'ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवता चतुर्थीकर्मणि आज्यहोमे विनियोगः।' 'ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम ।' एतावाघारौ ।।२।। 'ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः अग्निर्देवता चतुर्थीकर्मणि आज्यहोमे विनियोगः।' 'ॐ अग्नये स्वाहा इदमग्नये न मम' ।।१।। 'ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता चतुर्थीकर्मणि आज्यहोमे विनियोगः।' 'ॐ सोमाय स्वाहा इदं सोमाय न मम'।। एतावाज्यभागौ ।।२।। ततः अग्नेरुत्तरतः प्रोक्षणी-पात्रसमीपे जलपूर्णं पृथूदकं (फराकिलो) नाम पात्रं स्थापयेत् । दास्यमानाऽऽहुति-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चके तत्तदाहुत्यन्ते तत्रैव हुतशेषस्य प्रक्षेपं च कुर्यात् ।। ततः अनारब्ध

एव - 'ॐ अग्ने प्रायश्चित्त इत्यादीनां पञ्चानां परमेष्ठी ऋषिः अग्निवायु-सूर्यचन्द्रगन्धर्वा देवताः अनुष्टुप्छन्दश्चतुर्थीकर्मणि आज्यहोमे विनियोगः।' 'ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि, यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा । इदमग्नये न मम'।। इति हुत्वा पृथूदकपात्रे संस्रवं प्रक्षिपेत् ।। एवमग्रेऽपि ।।१।। 'ॐ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम ऽउपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं वायवे न मम' ।।२।। 'ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं सूर्याय न मम' ।।३।। 'ॐ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं चन्द्राय न मम' ।।४।। 'ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा । इदं गन्धर्वाय न मम' ।।५।। ततः प्रजापतिं मनसा ध्यायन् आज्याभिघारितेन स्थालीपाकेन स्रुवस्थापितेन -'ॐ प्रजापतये स्वाहा - इदं प्रजापतये न मम' इति हुत्वा हुतशेषं प्रोक्षणीपात्रे प्रक्षिपेत् ।। ततो ब्रह्मणाऽन्वारब्ध आज्यसहितं स्थालीपाकं स्रुवेणाऽऽदाय- 'ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम' इति ।। प्रोक्षणीपात्रे प्रक्षिपेत् ।। एवमग्रेऽपि ।। ततः केवलेन आज्येन वक्ष्यमाणा नवाहुतीर्जुहुयात्- 'ॐ व्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवताः चतुर्थीकर्मणि प्रायश्चित्तहोमे विनियोगः।' 'ॐ भूःस्वाहा इदमग्नये न मम' ।।१।। 'ॐ भुवः स्वाहा इदं वायवे न मम' ।।२।। 'ॐ स्वःस्वाहा इदं सूर्याय न मम' ।।३।। 'ॐ त्वन्नोऽ अग्ने इति वामदेव ऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दश्चतुर्थीकर्मणि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रायश्चित्तहोमे विनियोगः।' 'ॐ त्वन्नोऽ अग्ने व्वरुणस्य व्विद्वान् देवस्य हेडो अवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो व्विश्वाद्वेषाᳪ सि प्रमुमुग्ध्यस्मत् स्वाहा ।। इदमग्नीवरुणाभ्यां न मम' ।।४।। 'ॐ सत्वन्न इति व्वामदेव ऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दश्चतुर्थीकर्मणि प्रायश्चित्तहोमे विनियोगः।' 'ॐ सत्वन्नोऽअग्ने वमोभवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ। अवयक्ष्वणो व्वरुणᳬ रराणो व्वीहि मृडीकᳬ सुहवो नऽएधि स्वाहा ।' 'ॐ इदमग्नीवरुणाभ्यां न मम' ।।५।। 'ॐ अयाश्चाग्न इति वामदेव ऋषिरग्निर्देवता त्रिष्टुप्छन्दश्चतुर्थीकर्मणि प्रायश्चित्तहोमे विनियोगः।' 'ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्वमित्वमयाऽ असि । अयानो यज्ञं वहास्ययानो धेहि भेषजᳪ स्वाहा । 'ॐ इदमग्नये न मम' ।।६।। 'ॐ ये ते शतमिति वामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वे देवाः मरुतः स्वर्काश्च देवताश्चतुर्थीकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः।'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

'ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नोऽअद्य सवितो तद्विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा । ॐ इदं व्वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्क्केभ्यः ।।७।। 'ॐ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो व्वरुणो देवता चतुर्थीकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः।' 'ॐ उदुत्तमं व्वरुणपाशमस्मदवाधमं व्विमध्यमꣳ श्रथाय । अथाव्वयमादित्यव्व्रते तवानागसो अदितये स्याम स्वाहा । ॐ इदं व्वरुणाय न मम' ।।८।। 'ॐ प्रजापतय इति प्रजापतिर्ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दश्चतुर्थीकर्मणि सर्वप्रायश्चित्तहोमे विनियोगः ।' 'ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम'। इति मनसा ।।९।।

ततः संस्रवप्राशनम्, आचमनं च वधूवरयोः।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ पूर्णपात्रदानम् ।। सकुशोदकं पूर्णपात्रमादाय - 'ॐ अद्यकृते-

तच्चतर्थीहोमकर्मणः अपूर्णस्य पूरणार्थमिदं सद्रव्यफलब्रह्मसूत्रं पूर्णपात्रं प्रजापतिदैवतं अमुक गोत्राय अमुक शर्मणे ब्रह्मरूपाय तुभ्यमहं संप्रददे'।

इति दद्यात् ।।' स्वस्तीत्युच्चार्य ब्राह्मणः प्रतिगृहणीयात् ।।

ततः प्रणीताविमोकः - 'ॐ सुमित्रिया०, दुर्मित्रिया० इति द्वयोर्यजुषोः प्रजापतिर्ऋषिरापो देवताः, प्रणीताविमोके विनियोगः ।' 'ॐ सुमित्रियान-ऽआपऽओषधायः सन्तु' इति सपवित्रेण प्रणीताप्रोक्षण्योर्जलेन वधूवरौ अभिषिच्य ।। 'ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान् द्वेष्टि यं च वयं द्विष्मः ।। इति ऐशान्यां प्रणीतापात्रं न्युब्जीकुर्यात् ।।

तत आस्तरणक्रमेण बर्हीषि समानीय घृतेनाऽभिघार्य हस्तेन जुहु-यात् ।। तत्र मन्त्रः- 'ॐ देवा गातु विदो गातुमिति मन्त्रस्य वनस्पति-ऋर्षिर्विराट्छन्दो वातो देवता बर्हिर्होमे विनियोगः।' 'ॐ देवा गातु विदो गातुं वित्त्वा गातु मित । मनसस्पतऽइमन्देवयज्ञꣳ स्वाहा वाते धाः।। इति ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततः पृथूदुकपात्रस्थजलेन साम्रपल्लवेन समन्त्रपाठं वधूमभिषिञ्चेद्वरः। तत्र मन्त्रः- 'ॐ या त इत्यस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः वधूर्देवताऽभिषेचने विनियोगः।' 'ॐ या ते पतिघ्नी प्रजाघ्नी पशुघ्नी यशोघ्नी गृहघ्नी निन्दिता तनूः। जारघ्नीं तत एनां करोमि । सा जीर्य त्वं मया सह अमुक नाम्नीदेवि ।। (वध्वाः पूर्वधृतं नाम, अस्मिन्नेव समये कल्पितं वा नाम वरो गृहणीयात् ।।)

ततो जुष्टप्राशनम् (जूठो ख्वाउने) ।। वरः 'ॐ प्राणैस्त इति मन्त्रस्य प्रजापतिर्ऋषि-र्यजुर्वधूर्देवता चरुशेषभोजने विनियोगः ।' 'ॐ प्राणैस्ते प्राणान् संदधामि' (१)। 'ॐ अस्थिभिस्ते अस्थीनि संदधामि' (२)। 'ॐ मांसैस्ते मांसानि संदधामि' (३)। 'ॐ त्वचा ते त्वचं संदधामि' (४)। इति मनसा मन्त्रं जपन् चतुर्वारं स्वभुक्तशेषं स्थालीपाकं वधूं प्राशयेत्, आचामेत्, आचमयेच्च ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततो वरः वधूदक्षिणस्कन्धतो नीतेन स्वदक्षिणपाणितलेन वध्वाः

हृदयं स्पृशेत् । तत्र मन्त्रः- 'ॐ यत्ते इति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो वधूर्देवता हृदयाऽऽलम्भने विनियोगः।' 'ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् । वेदाऽहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्' ।। इति ।। अस्मिन्नवसरे यथाऽऽचारं कङ्कणमोचनम्, अञ्चलग्रन्थिमोचनम्, द्यूतग्रन्थिमोचनम् च भवति ।।

अथ पूर्णाहुतिः ।। उत्थाय होता ब्राह्मणाऽन्वारब्धः सपत्नीकेन वरेण च पादयोरन्वारब्धः स्रुवे फलादिकं निधाय अविच्छिन्नया घृतधारया- 'ॐ मूर्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता चतुर्थीकर्मणि पूर्णाहुतिहोमे विनियोगः ।' 'ॐ मूर्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः स्वाहा' ।। इति जुहुयात् ।।

ततः स्रुवेण दग्धं चरुमानीय दक्षकराऽनामिकया वधूवरयोस्तिलकं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुर्यात् । 'ॐ त्र्यायुषमिति नारायण ऋषिरुष्णिक्छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः ।' 'ॐ त्र्यायुषं जगदग्नेः' इति ललाटे । 'ॐ कश्यपस्य त्र्यायुषम्' इति ग्रीवायाम् । 'ॐ यद्देवेषु त्र्यायुषम्' इति दक्षिणबाहुमूले । 'ॐ तन्नोऽअस्तु त्र्यायुषम्' इति हृदि ।।

ततो वरः कृतस्य होमकर्मणः साङ्गतायै पूर्वोक्तरीत्या गां , भूयसीं दक्षिणां च संकल्प्य दद्यात् ।। ब्राह्मणाश्च पूजितान् देवान् 'यान्तु देवगणा०' इत्यादिना, वह्निं च – 'ॐ यज्ञयज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा । एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्व वीरस्तं जुषस्व स्वाहा' ।। इत्यनेन विसृज्य, कलशजलेन वधूवरावभिषिच्य, गन्धपुष्पादिभिराशीर्वादं समन्त्रपाठं दद्युः ।। वरश्च सपत्नीकः साञ्जलिबद्धः- 'ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ।। 'ॐ अच्युताय नमः ३ ।। ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ।। इतीश्वरं प्रार्थयेत् ।।

अथाऽऽचाराद्वधूः पत्युः पादौ प्रक्षाल्य तदुदकं पिबेत् ।। ततश्च यथाकुलाचारं कुर्वाणौ वधूवरौ यथासुखं तिष्ठेताम् ।।

।। इति चतुर्थीकर्म समाप्तं शुभम् ।।

अथ अर्कविवाहविधिः

अथ तृतीये विवाहे करिष्यमाणेऽवश्यकरणीयोऽर्कविवाहविधिः ।। तृतीयां यदि चोद्वाहेत् तर्हि सा विधवा भवेत् । चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् ।। इत्यादि संग्रहादिवचनेभ्यो दोषश्रवणात् तृतीये विवाहे कर्तव्ये अर्कविवाहः प्राक्करणीय एव श्रेयोऽभिलाषिणा ।। विवाहदिनात् प्राक्तने पञ्चमादौ रविवासराऽन्विते शनिवासराऽन्विते वा शुभनक्षत्रयुक्ते ग्रहानुकूल्यवति ज्योतिर्विदादिष्टे शुभदिने ग्रामात् प्राच्यामुदीच्यां वा दिशि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सफलं सपुष्पं सम (समीप) देशवर्तिनमर्कवृक्षं प्राप्य तदधस्तात् होमवेदीं निर्माय, अर्कवृक्षं मध्ये कृत्वा तण्डुलपिष्टेन अष्टदलानि विधाय, अर्कविवाहसामग्रीं संपाद्य, विवाहकर्ता शुद्धे आसने उपविश्य दीपं प्रज्वाल्य, आचम्य, प्राणानायम्य, कुशादीन्यादाय, पूर्वसंकल्पमुच्चार्य, 'अमुक गोत्रः अमुक शर्माऽहं तृतीयमानुषीपरिणयजन्यदोषपरिहाराय अर्कविवाहं, तदङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं मातृकापूजनं नान्दीश्राद्धप्रत्याम्नायीभूतं सुवर्णदानं केचन शिष्टाः कुर्वन्ति । नान्दीश्राद्धं पुण्याहवाचनम् अचार्यादिवरणं च करिष्ये' इति संकल्प्य, संकल्पोल्लिखितानि अङ्ग-कर्माणि यथाक्रमं सविधि कृत्वा, अर्ककन्यादातारं कंचन इतरं भिन्नगोत्रं ब्राह्मणम् वृणुयात्, वरणसामग्रीं गन्धाक्षतफलपुष्पाणि सकुशोदकां गृहीत्वा 'ॐ अद्य अमुक गोत्रः अमुक शर्माऽहं करिष्यमाणार्कविवाहकर्मणि अर्ककन्यादान-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

करणार्थमेभिर्गन्धाक्षतपुष्पैर्दातृत्वेन अमुक गोत्रं अमुक शर्माणं त्वामहं वृणे' इति ।। ब्राह्मणश्च 'वृतोऽस्मि इति प्रतिब्रूयात् ।। ततः कर्ता बद्धाञ्जलिः- 'कन्यापिता यथा सूर्यो देवानां च प्रजापतिः। तथा त्वामर्कदानार्थमाचार्यत्वं कुरु द्विज' इति प्रार्थयेत् ।। ततो दाता - 'ॐ आचार्यत्वं करवाणि' इत्युक्त्वा वरं मधुपर्कविधिना अभ्यर्च्य, वरणसामग्रीं (गन्धाक्षतपुष्पफलानि) सकुशोदकां गृहीत्वा – 'ॐ अद्य अमुक गोत्रः अमुक शर्माऽहम् अर्ककन्याप्रतिग्रहार्थमेभिर्गन्धाक्षतपुष्पफलैस्त्वां वृणे' इति वृणुयात् ।। ततो वरः साञ्जलिः- ''त्रिलोकसाक्षिन् सप्ताश्व छायया सहितो रवे । तृतीयोद्वाहजं दोषं निवारय सुखं कुरु'' इति प्रार्थ्य-अर्कवृक्षे एव वा विधिना स्थापिते कलशे, तन्मुखस्थापितायां स्थाल्यां निहितायाम् अग्न्युत्तारण-पञ्चगव्यप्लावनसंस्कृतायां सुवर्णप्रतिमायां वा

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

- 'ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन्।।' इति मन्त्रेण सूर्यमावाह्य, रक्तेन वस्त्रेण वा अर्कवृक्षमावेष्ट्य, नाममन्त्रेण आसनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानीयं, पुनराचमनीयं, रक्तवस्त्रं, यज्ञोपवीतं, गन्धम्, अक्षतान्, रक्तपुष्पाणि, धूपं, दीपं, गुडौदननैवेद्यम्, ताम्बूलं, दक्षिणां च समर्प्य, आपोहिष्ठेत्यादिभिस्त्रि-भिर्मन्त्रैर्जलेनाऽभिषिच्य उत्थाय- 'मम प्रीतिकरा या वै त्वया सृष्टा पुरातनी। अर्कजा ब्रह्मणा सृष्टा अस्माकं परिरक्षतु' इत्येकवारं परिक्रम्य, पुनः साञ्जलिः- 'ॐ नमस्ते मङ्गले देवि नमः सवितुरात्मजे । रक्ष मां कृपया शश्वत् पत्नीत्वं म इहाऽऽगता' इति परिक्रम्य प्रार्थयेत् – 'ॐ अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च । वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः।। सर्वारिष्टहरो नित्यं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वमङ्गलदायकः । तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय'।। इति।।
ततः पञ्चभूसंस्कारपूर्वकमग्निं प्रतिष्ठाप्य वरः कर्मसमीपे प्राङ्मुख उपविशेत् ।। वरस्य अर्कस्य च मध्ये पटं प्रसार्य पटेन वरं व्यवधाय आचार्यादयो ब्राह्मणाः "मङ्गलं भगवान् विष्णुः०" इत्यादिकान्, "स्वस्तिनऽ इन्द्रो वृद्धश्रवाः०, भद्रं कर्णेभिः०, आ नो भद्रा०, इत्यादिकान्, वैदिकाँश्च मन्त्रान् पठेयुः ।। ततोऽन्तःपटमपसार्य, दानाचार्यः- 'ॐ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ सम्मातरिश्वा सन्धाता समुदेष्ट्री दधातु नौ ।।' इति मन्त्रेण समञ्जनं (अर्कवृक्षकर्मकं वरकर्तृकं निरीक्षणं) कारयेत् ।। पुनः आचार्यादयः स्वस्तिनऽ इन्द्रो० इत्यादिकान् पूर्वोक्तान् मन्त्रान् पठेयुः ।। ततो दानाचार्यः- सकुशोदकम् अर्कशाखाग्रं गृहीत्वा पूर्वसंकल्पमुच्चार्य 'अमुक गोत्र अमुक शर्माऽहं काश्यप -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

गोत्राम्, काश्यपावत्सारनैध्रुवेति त्रिप्रवराम् , आदित्यस्य प्रपौत्रीम्, सवितुः पौत्रीम्, अर्कस्य पुत्रीम् ......।।

काश्यपगोत्रस्यैव वरस्य विवाहे तु कन्याप्रद आचार्यः अर्ककन्याम् सूर्येण आत्मने प्रसादीकृतां मन्यमानः आत्मन एव प्रपितामहं पितामहं पितरं चोल्लिख्य तत्प्रपौत्रीपौत्रीपुत्रीत्वेन अर्ककन्यामुल्लिख्य स्वभगिनीबुद्ध्या दद्यादिति ऋषिभट्टप्रभृतयः संस्कारभास्करादिषु भाषन्ते ।। 'अमुक गोत्रस्य अमुक प्रवरस्य अमुक शर्म्मणः प्रपौत्राय अमुक शर्मणः पौत्राय, अमुक शर्मणः पुत्राय (इति त्रिवारमुच्चार्य) अमुक गोत्राय प्रवराय अमुक शर्मणे वराय तुभ्यं संप्रददे, इति वरहस्ते दद्यात् ।। कृताञ्जलिः – 'अर्ककन्यामिमां विप्र यथाशक्तिविभूषिताम्। गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय' इति पठेत् । दानप्रतिष्ठासिद्ध्यर्थं संकल्प्य सुवर्णं च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दद्यात् ।। वरः- अञ्जलौ जलगन्धाक्षतपुष्पाण्यादाय, –'ॐ यज्ञो मे कामः समृध्यताम्' इति तत्रैव क्षिपेत् ।। पुनस्तान्यादाय –'ॐ यशो मे कामः समृध्यताम्' इति तत्रैव क्षिपेत् ।। ततो गायत्रीमन्त्रं जपन् सूत्रेण पञ्चवारमर्कवृक्षं वेष्टयित्वा तत्सूत्रं निष्कास्य पञ्चगुणं कृत्वा -'ॐ बृहत्साम क्षत्रभृद्वृद्धबृष्णियं त्रिष्टुभौजः शुभितमुग्रवीरम् । इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष ।।' इति मन्त्रेण अर्कस्कन्धे बध्नीयात् ।।

ततः पूर्वनिर्मितेषु अष्टसु दलेषु अलंकृतान् ताम्रमयान् मृण्मयान् वाऽष्टकलशान् निधाय तान् वस्त्रेणाऽऽवेष्ट्य तेषु हरिद्राम् अष्टौ गन्धाँश्च प्रक्षिप्य – "श्रीखण्डाऽगरुकर्पूराः सगोरोचनकुङ्कुमाः। लाक्षामृगद्वीपिमदौ गन्धा अष्टौ प्रकीर्तिताः।।" तन्मुखेषु स्थालीं तस्यां च सौवर्णी-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मग्न्युत्तारणपञ्चगव्य-प्लावनशोधितां विष्णुप्रतिमां निधाय, पूर्वादिक्रमेण

सर्वासु प्रतिमासु –'ॐ इदं व्विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपाᳬं सुरे०' इति मन्त्रेण विष्णुमावाह्य पाद्यादिभिर्नैवेद्य-नीराजनान्तैरुपचारैः संपूजयेत् ।। ततोऽग्निमानीय –'ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे, तेन यज्ञमव तेन यज्ञपतिं तेन मामव ।।' इति मन्त्रेण, 'ॐ वरदनामन् ! अग्ने इहाऽऽगच्छ इह तिष्ठ' इति प्रतिष्ठाप्य नाममन्त्रेण संपूजयेत् ।। आचार्यः कुशकण्डिकां होमसंकल्पान्तामग्नि-स्थापनोक्तां समापयेत् ।। ततो वरः कुशादीन्यादाय देशकालौ, स्वकीये गोत्रनामनी च संकीर्त्य, 'अस्मिन्नार्कीविवाहकर्मणि प्रजापतिम्, इन्द्रम्, अग्निम्, सोमम्, बृहस्पतिम्, अग्निम्, वायुम्, सूर्यम्, प्रजापतिम्, अग्निम्, वायुम्, सूर्यम्, अग्नीवरुणौ, अग्नीवरुणौ, अग्निम्, वरुणम्, सवितारम्, विष्णुम्, विश्वान् देवान्, मरुतः, स्वर्कान्, वरुणं,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रजापतिं, तथैतत्कर्मप्रधानभूतं बृहस्पतिम्, अग्निम्, अग्निवायुसूर्यान्, प्रजापतिम्, अग्निं, स्विष्टकृतं चाऽऽज्येनाऽहं यक्ष्ये' इति संकल्पयेत् ।।

ततः स्वयमाचार्यो वा दक्षिणं जानु निपात्य मनसा प्रजापतिं ध्यायन् –'ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम' इत्यादिरीत्या संकल्पोल्लिखिताभ्यः प्रजापत्यन्ताभ्यो देवताभ्य आज्याहुतीर्दत्त्वा –'ॐ सङ्गीभिरित्यस्य अङ्गिरसऋषिस्त्रिष्टुप्छन्दो बृहस्पतिर्देवताऽऽज्यहोमे विनियोगः ।। ॐ सङ्गीभिरङ्गिरसो नक्षमाणो भग इवेदर्यमणन्निनाय । जने मित्रो न दम्पती अनक्ति बृहस्पतये वाजयाऽऽशूँरिवाजो स्वाहा ।। इदं बृहस्पतये न मम' ।।१।। 'ॐ यस्मैत्वेति वामदेवऋषि-स्त्रिष्टुप्छन्दोऽग्निर्देवताऽऽज्यहोमे विनियोगः ।। ॐ यस्मै त्वा कामकामाय व्वायं सम्राड्यजामहे । तमस्मभ्यं कामं दत्त्वाऽथेदं त्वं घृतं पिब स्वाहा ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदमग्नये न मम' ।।२।। 'ॐ यस्तसमस्तव्याहृतीनां प्रजापति-ऋर्षिर्गायत्र्युष्णिगनुष्टुब्बृहत्यश्छन्दांसि अग्निवायुसूर्यप्रजापतयो देवता आज्यहोमे विनियोगः ।। ॐ भूः स्वाहा इदमग्नये न मम' ।।३।। 'ॐ भुवः स्वाहा इदं वायवे न मम' ।।४।। 'ॐ स्वः स्वाहा इदं सूर्याय न मम' ।।५।। 'ॐ भूर्भुवः स्वाहा इदं प्रजापतये न मम' ।।६।। इति षट् प्रधानाहुतिर्जुहुयात् ।। ततः भूराद्याः नवाहुतीः (अग्निस्थापनोक्ताः प्रायःश्चित्तसंज्ञकाः) हुत्वा – 'ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम' । इति जुहुयात् ।। ततः संस्त्रवप्राश-नम् ।। ततः प्रणीताविमोकं, बर्हिर्होम, पूर्णपात्रदानं च कृत्वा । वरः पुनरर्कवृक्षं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रदक्षिणीकृत्य-''मया कृतमिदं कर्म स्थावरेषु जरायुणा । अर्काऽपत्यानि मे देहि तत्सर्वं क्षन्तुमर्हसि'' ।। इति प्रार्थयेत् ।। तत आचार्यादयः शान्तिपाठं पठेयुः ।। ततश्च वरः गन्धाक्षतपुष्पैरर्कविष्णवादींश्च संपूज्य, 'यान्तु देवगणाः सर्वे०' इत्यादिना विसृज्य, आचार्याभ्यां गावौ (तन्निष्क्रयद्रव्यं वा) संकल्प्य पृथक् पृथक् दत्त्वाऽन्येभ्यो ब्राह्मणेभ्यस्ताभ्यां च भूयसीं दक्षिणां दद्यात् । ते च तं कलशोदकैः समन्त्रपाठमभिषिञ्चेयुः ।। इति ।। तद्दिनादारभ्य पञ्चमे दिने अर्कवृक्षं पुनः पुनः संपूज्य अग्निं विसर्जयेत् ।।

यस्य जन्मकुण्डल्यां पत्नीघ्नो योगो भवति तस्यैव तृतीये चतुर्थे विवाहे कर्तव्ये एषः अर्क विवाहः कर्तव्यो नान्येषामिति निर्णयः ।।

।। इत्यर्कविवाहपद्धतिः समाप्तः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ इति ॥

विवाह पद्धतिः



नेपाली भाषा - टीका स्वयम्बर सहितम्

प्रकाशक : श्री दुर्गा साहित्य भण्डार
पोस्ट बाक्स नं० 1096
नेपाली खपड़ा, वाराणसी - 221001

CC-0. Nepal Sanskrit Academy, Kathmandu Collection